अथ दर्पणविधिः प्रारंभः।

॥श्रीगणेशायनमः॥ ॥अथरुद्रपद्धतिप्रारंभः॥ हरिःॐमद्वरामेश्वरसुतोषदृनारायणः स्मृतीः।प्रणम्यरामं
तनुतेरुद्रानुष्ठानपद्धतिं॥तत्रतावद्यद्यप्यनेकासुयजुःशारवोरुद्रःपठ्यतेतथापितैत्तिरीयशारवापाठानुसारेण सुर
प्रयोगउच्यते।स्मार्तरुद्रप्रयोगस्यबौधायनस्यचमूलकल्पेनबह्वृचादीनांचतत्रबौधायनंग्राह्यंबह्वृचादिभि
रादरादितिवाक्यानुसारेणबौधायनीयानुरोधत्वादिति॥इहचरुद्रानुष्ठानेत्रैवर्णिकानामेवाधिकारोनस्त्रीशूद्रा
नुपनीतानांतेषांवैदिकमंत्रयुक्तकर्मण्यध्ययनाभावेनसाक्षाद्यजनाभावाच्चानधिकारादिति।अन्यत्रचैतद्विस्त
रेणनिर्णीतं।तत्ररुद्रःपंचधा।रूपंरुद्रीलघुरुद्रोमहारुद्रोतिरुद्रश्चेतिएकादशगुणवृध्या।सर्वश्रायंत्रेधाजप १
रुद्रोहोमरुद्रोभिषेकरुद्रश्चेति।जपरुद्रोपिद्वेधा।केवलजपात्मकोहोमांगकश्चेति।होमाभिषेकयोस्तुकेवलतदा
त्मकत्वमेवातत्रतावत्पापक्षयकामःश्रीरुद्रप्रीतिकामोवाउत्तरायणादौगुरुशुक्रास्तबाल्यवार्धक्यादिरहिते
शुभेकालेशुक्लपक्षादौरिक्तामौमव्यतीपातविष्ट्यादिदोषरहितेदिनेयादिस्वाध्यायक्षमतिथौचंद्रानुकू

ल्येरुद्रमंडपंकृत्वास्नातःशुचिःशुक्लवासाःसपत्नीकोयजमानःपूजितेष्टदेवताकोगोमयलिप्तेशुचौदेशेप्राङ्मुखउ
पविश्यप्राणानायम्यदेशकालौसंकीर्त्यममकायिकादिसर्वविधपापक्षयार्थंश्रीरुद्रप्रीत्यर्थंवामुकरुद्रमहं क
रिष्यइतिसंकल्पयेत्।पुत्रकामस्तुदीर्घायुःसुपुत्रसिध्यर्थंमहारुद्रमेवसंकल्पयेत्।सनवग्रहरुद्रकरणेनुसनव
ग्रहमखंरुद्रंकरिष्यइतिविशेषः।एवंप्रधानसंकल्पंविधाय।एतत्कर्मणःनिर्विघ्नेनपरिसमाप्त्यर्थंगणेश
पूजनंकरिष्ये।कर्मांगतयापुण्याहवाचनंमातृकापूजननांदीश्राद्धमाचार्यादिवरणंचकरिष्यइतिसंकल्पयेत्॥
प्रत्येकंवासंकल्पः।ततःषोडशभिःपंचभिर्वापिचारैर्गणेशंपूजयित्वाअवनिक्तनजानुमंडलंकृत्वाघाश्चत्वायनरघ्य
परिशिष्टोक्तविधिनापुण्याहंवाचयित्वागोर्यादिषोडशब्राह्म्यादिसप्तमातॄःपूजयेत्॥ततोविधिनानांदीश्राद्धंचकु
र्यात्॥ततःशांतंदांतंसुवस्त्रंवैदिकंकुटुंबिनंकर्मविधिज्ञंआचार्यममुकप्रवरोपेतंसममुकगोत्रंसमुकशर्माणंम
मुकप्रवरोपेतममुकगोत्रंनामसमुकशर्माणमाचार्यंत्वांवरणइतिवृणुयात्।क्षत्रियस्यचामुकनर्माणंवैश्य

२ एताभ्यपदार्थानुसमयेनकांस्यानुसमयेनवास्तपुंगादीपूजनेआवाहनादिविसर्जनांतंकुर्यात्।प्रतिमापूजनेत्वावाहन २
विसर्जनेनस्तः॥२

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रुद्र० स्तऽअमुकगुत्रोऽहमिति।ततःप्रार्थनं।आचार्यस्तथास्त्वेत्याशीर्वादानंकरिष्यति।तथात्वंममयज्ञेस्मिन्भाचार्यो
भवसुव्रत॥एवंब्रह्माणंवरित्वाप्रार्थयेत्॥यथाचतुर्मुखोब्रह्मास्वर्गलोकेपितामहः।तथात्वंममयज्ञेस्मिन्ब्रह्मा
वसुचिव्रत॥सदस्यंरुणुयात्प्रार्थयेच्च।भगवन्सर्वधर्मज्ञसर्वधर्मज्ञतांवर॥वितनेममयज्ञेस्मिन्सदस्योभवसत्त
मः॥ततोऽत्विजोवरुणुयात्॥तत्ररुद्रेएकमाचार्यमेवनार्त्विजः॥लक्षपुरुद्रमहारुद्रेचैकादशवा।अतिरुद्रेएकाद
शएकविंशत्यन्तरशतंवेत्यत्विक्संख्याजपहोमादिकंसर्वमेवकुर्यात्।तस्याशक्तौप्रतिनिधीन्ऋत्विजोवृणुयात्॥ २
प्रतिनिधिपक्षेत्वनियमइतिस्मार्तादयिकाः।सनवग्रहपक्षेग्रहरुद्रजपोमार्यत्वेनैषांवरणंकार्यं।यद्वा
रुद्रजपार्थंब्राह्मणवरणात्पूर्वंग्रहजपार्थमनियमेनैकंद्वौत्रीन्वाविप्रान्वृणुयात्।तत्रआचार्यादीन्मधुपर्केणार्हयि
त्वावस्त्रालंकारादिभिःपूजयेत्॥स्मार्तेमधुपर्कोक्तिर्नेच्छंतिप्रतिनिधित्वेनजपार्थवरणेवस्त्रादिपूजैवनम
धुपर्कः॥आचार्यादयःशिवायतनादौपुण्यनद्यादितीर्थतीरेगोष्ठादिपुण्यदेशेब्राह्मणगृहेयजमानगृहेवा

पकवचंनमोअस्तुनीलग्रीवायोतितनयनेत्रंप्रमुंचधन्वनस्त्वमुभयएतावंतभ्येतिदिग्बंधंकुर्यात्। इतिप्रथमः॥ ॐकारंमूर्ध्निविन्यस्यनकारंनासिकेतथा॥मोकारंतुललाटेवैभकारंमुखमध्यतः।गकारंकंठदेशेतुवकारंहृदिविन्यसेत्। तेकारंदक्षिणेहस्तेरुकारंवामतोन्यसेत्। दाकारंनाभिदेशेतुयकारंपादयोर्न्यसेत्। ॐमूर्ध्नेनमस्त्र्योंघेताक्षरात्मिनमोनान्यसेदितिद्वितीयः॥सद्यःचपादयोर्न्यस्यवामन्यस्योरुमध्यतः॥अघोरंहृदिविन्यस्यमुखेवत्पुरुषंन्यसेत्। ईशानंमूर्ध्निविन्यस्येतिमदाद्यिवात्मतांभावयित्वाकरसंपुटंकृत्वातोन्नोरुद्रेतिमंत्रंवंनोअग्नेसुगंनःपंथामसुत्वंनंतत्वायाम्यानोनियुद्भिर्वयंसोमनमीशानंमस्तेरुद्रास्योनापृथिवीतीदादीनमस्तेत्यात्मरक्षाकार्येतिअस्तेरुद्रास्योनापृथिवीत्येताभ्यांत्रातारमिंद्रमित्याघृणेमंत्रान्मंत्रेत्यंसंपुटीकृत्यपठेदितिवासंपुटइतिकेचिदितृतीयः। मनोज्योतिरबोध्यग्निर्मूर्धानंमर्माणितेजातवेदाहृदयमुरुशिरःसुविन्यस्यात्मरक्षाकर्त्तव्यतिचतुर्थः॥शिवसंकल्पंहृदयंपुरुषसूक्तंशिरोत्तरनारायणंशिखावाअग्नेतिरथंकवचंशतरुद्रीयमस्त्रमितिपंचमः॥प्रजनने ब्रह्मातिष्ठतुपादयोर्विष्णुस्तिष्ठतुहस्तयोरिंद्रस्तिष्ठतुप्रबाहोरिंद्रस्तिष्ठतुजठरेअग्निस्तिष्ठतुहृदयेशिव

स्तिष्ठतु। कंठेवसवस्तिष्ठंतुमुखेसरस्वतीतिष्ठतुनासिकयोर्वायुस्तिष्ठतुनयनयोः सूर्याचंद्रमसौतिष्ठेतांकर्णयोरश्विनौदेवौतिष्ठेतांललाटेरुद्रास्तिष्ठंतुमूर्ध्न्यादित्यास्तिष्ठंतुशिरसिमहादेवस्तिष्ठतुशिखायांवामुंगातिष्ठतुपृष्ठेपिनाकीतिष्ठतुपुरतःशूलीतिष्ठतुपार्श्वयोःशिवाशंकरौतिष्ठेतांसर्वतोवायुस्तिष्ठतुनतोबहिःसर्वतोग्निर्ज्वालामालापरिवृतस्तिष्ठतुसर्वेषुवेषुसर्वादेवतायथास्थानंतिष्ठंतुमांरक्षंतुरक्षितव्यः॥अथसर्वत्रस्नातानुलिप्तोअभिषेकंकुर्यादेतिबौधायनमतमितिकेचिदेषुन्यासेषुशरीरांतरविशेषउक्तः॥तद्यथापार्श्वनंतरंविजयधनुरितिजठरंरक्षेदनंतरंसंसरंजिदितिजंघयोर्विश्वंभूतमितिगुल्फयोरितिप्रजननादित्यासेचमूर्ध्न्यादित्यास्तिष्ठंत्वित्यनंतरंशिरसिमहादेवस्तिष्ठतुशिरवायांवामुंगातिष्ठतुइतिन्यासानंतरंहिरण्यगर्भोयःप्राणतोब्रह्मजलानंमहीद्यौरुपश्चासयाग्नेनयायेपअग्नेरक्षमयेत्येतौमंत्रान्जपेदिति।ततःअथात्मानमित्यादिभिर्ध्यायेत्।ततोऋषिदैवतछंदांसिस्मरेत्।तदभावेजपादेवैर्यथास्मरणात्।तत्रग्रहपक्षेग्रहादिमंत्राणामृष्यादिन्यासस्थापनप्रकरणेवक्ष्यमाणानिद्रष्टव्यानि।ततोरुद्रस्यऋष्यादिस्मरेत्।तद्यथा।नमकानांप्रथमस्यवामदेवोऋषिरनुष्टुप्छंदोरुद्रोदेवतागायत्रीछंदोद्वितीयायाआत्रेय

रुद्र० स्तनीयायाः कश्यपस्तनोद्योर्गोतमस्तनएकस्याःकण्वस्तनोद्योर्मरुत्वान्तनएकस्याभगवान्ततस्तिस्रणांनारद
स्ततस्तिस्रणांभगवान्द्वितीयानुवाकस्यमंडूकस्तनीयानुवाकस्यभगवान्-चतुर्थानुवाकस्यदुर्वासाः पंचमषष्ठा
नुवाकयोर्भगवान्सप्तमानुवाकस्यरेभकोरोष्टमानुवाकस्यनवमानुवाकस्यभगवान्अवशिष्टस्याग्निःदशा
मानुवाकस्यप्रथमस्यपुत्रोद्वितीयस्यस्कंदस्तनोद्योर्मंडव्यस्तनएकस्यदेवराट्तनएकस्यभगवान्ततएकस्या
त्रिस्तनएकस्यवैयाघ्रस्तनएकस्याभगवान्ततएकस्यदैराजस्तनएकस्यपुलस्त्यस्तनएकस्यनारदस्तनएकाद
शानुवाकेआद्यानांचतुर्णांदुर्वासास्तनआसमाप्तेर्देवलइत्यृषयः। प्रथमानुवाकेआद्यस्यरुद्रस्तनएकस्यशंभु
स्तनएकस्यस्कंदात्मारुद्रस्तनोद्योरुद्रस्तनएकस्यशंभुस्तनोद्योरादित्यात्मारुद्रस्तनएकस्यशंभुस्ततस्तिस्रणांरु
द्रस्ततस्तिस्रणांभगवांस्तनोद्वितीयतृतीयानुवाकयोरुद्रश्चतुर्थंपंचमषष्ठानुवाकानांशंभुः सप्तमानुवाकस्यरु
द्रोष्टमानुवाकस्यनमोवःकिरिकेभ्यइत्यंतस्य-चनवमस्यभगवान्अवशिष्टस्यरुद्रोदशमानुवाकोवा-चतुर्णांरु
द्रस्तनएकस्यनंदीश्वरात्मारुद्रस्तनएकस्यभगवांस्तनएकस्यशंभुस्तनएकस्यरुद्रस्तनएकस्यभगवांस्तनोद्योः

~~नमोनुवा~~

शंभुस्तनोवशिष्टानांरुद्रइतिदेवताः। प्रथमानुवाकेआद्येनुष्टुभौतनएकास्यराजनुष्टुप्तनएकानि-रदनुष्टुप्तनएका
नुष्टुप्तनएकानिरदनुष्टुप्तनएकाप्रस्तारपंक्तिस्तनएकाषट्पदाजगतीततःसप्तानुष्टुभस्तनोष्टावनुवाकायऋषि
स्तनएकाप्रस्तारपंक्तिः पंचपदापंक्तिर्वातनएकानुष्टुप्तनश्चनस्तोजगत्यस्तनास्तिस्रस्त्रिष्टुप्तस्तनएकाषट्पदात्रि
ष्टुप्महाबृहतीवातनोद्वादशानुष्टुभस्तनस्त्रीणियजूंषि~~तत्तत्तिस्रोनुष्टुभस्तनएकंयजुरिति~~छंदांसिअथचमका
नामग्निःकांडऽऋषिः।आद्यान्नवैछंदवीगायत्रीशिष्टंयजुः।वाजादयोभादिविशेषालिंगोक्ता देवताः।जपादौविनियो
गः।एतदंतंविधाययजमाना-चार्यब्रह्मसंनिधावत्विग्भिः सावधानैः संतापांतरमकुर्वद्भिः श्रीरुद्रंध्यायद्भिर्यजमा
नस्यकामःसिध्यतामितिचिंतयद्भिश्चस्वरवर्णविवेचनपूर्वंजंजपंकुर्युः।। होमरुद्रेप्येवमेवहोमः कार्यः।अभिषेकरु
द्रेनुषष्ठ्यामानंतरमग्निर्मेवाचिश्रितइत्यादियथालिंगमंगानिसंस्थाप्यात्मानमेभ्यैरुद्रैरंगैरधुष्याप्तैरुपदीपैः
प्रत्यक्षैर्मानसैर्वाआराध्यआराधितोमनुष्यैरुद्रस्वयंसिद्धैरितिध्यात्वकंयजामहइतिआवाहनंतुरंयरुतिमंत्रोक्तानं
पपद्यामहीतिचशिवमावाहयतोक्तानायवेनमोनमइतिआसनंदत्वाभवेभवेनातिभवेभवस्वमामितिपाद्यंदत्वा

रुद्रः ॥ अ बोऽग्रायनमरत्यैकोहिष्टामयोभुव इतितिस्रभिश्चस्नानं दत्वाअर्घं देवंतर्पयामिशर्वं देवंतर्पयामि। ईशानं देवंत॰ पशुपतिं देवंत॰ रुद्रं देवंत॰ उग्रं देवंत॰ भीमं देवंत॰ महांतं देवंतर्पयामीतितर्पयित्वाज्येष्ठायनमरत्याचमनीयंदत्वा श्रेष्ठायनमरतिमधुपर्कंदत्वाकालायनमरतिगंधंकृत्तिकरणायनमरतिपुष्पंसर्वरुद्रदमनायनमरति धूपंमनोन्म नायनमरतिदीपंअबोऽग्रायनमरतिनैवेद्यंदत्वात्रीमाचमनंदत्वाअष्टौपुष्पाणिअवादिनामभिर्भवायदेवायनमर तिएवमादिप्रयोगेणसमर्चयेत्।अघोरेभ्योथघोरेभ्यइतिमंत्रत्रयेणोपस्थायहिरण्यरजतताम्रादिपात्रेणसंततधा रयादुग्धादिनोदकेनवाभिषिंचपुनःपूजयेदितिरुद्रजपादौचसर्वसाधारणएषविधिः॥रुद्रस्यनमकाध्यायात्मकस्य रूपमात्रजपादौचमकाध्योपिसरुद्रावर्त्तनीयः।रुद्रीजपादौतुप्रत्यावर्त्त्यैकैकश्चमकानुवाकोयोजनीयइतिएतादृश्या श्चरुद्धा॥एकादशावर्त्तनौलघुरुद्रः॥तदेकादशावर्त्तनोमहारुद्रः।तदेकादशास्तावतिरुद्रः संपद्यते।तत्रजपेभिषेकेच नमोवःकिरिकेभ्यइतिसप्तस्तानिसहस्रशइतिनमोरुद्रेभ्योयेपृथिव्यामितिचैतेपर्य्यायमेवपठनीयाः।होमेतु योनिशेषःसोग्रेवक्ष्यति॥रुद्रस्यसंकल्पादिब्राह्मणभोजनपर्यंतंयजमानाचार्यब्रह्मर्त्विजांनियमाः।हविष्यभोज

नंब्रह्मचर्यमधःशय्यापतितादिभिरसंभाषणमक्रोधःशुचित्वादयोद्रष्टव्याः।एवंजपंसमाप्यहृदयादिप्राणन्यासंकृत्वारुद्रंजपंनिवेदयेत्।ततस्तदंगहोमार्थंहोमरुद्रैधानहोमार्थंमंडपंकुंडंचकुर्यात्।इदंचहयंहोमांगमेव।अनावश्यकंच। करणेतुफलाधिक्यं।तत्रमंडपोष्टहस्तोदशहस्तश्चकनिष्ठः।द्वादशहस्तश्चतुर्हस्तश्चमध्यमः। षोडशहस्तोष्टादशहस्तश्चोत्तमः। सर्वेसमचतुरस्राश्चतुर्द्वाराः कार्याः।तत्राष्टहस्तादिमंडपास्तावन्मानसूत्रेणप्राच्यादिसाधनपुरःसरंसमचतुरस्रान्साधयित्वातत्सूत्रंत्रेधाविभागेनपातयित्वाबाह्येषुद्वादशसूत्रसंपातेषुद्वादशस्तंभान्निरवनेत्।चतसृषुदिक्षुद्विहस्तचतुरंगुलाधिकद्विहस्तअष्टांगुलाधिकद्विहस्तविस्तृतानि द्वाराणिकर्तुंद्वारशाखास्तंभयोर्द्वयंद्वयंनिखनेयं।एतेचविंशतिस्तंभाः पंचहस्ताः कार्याः।तेषांचोपरिचूतासुसर ध्रकाष्ठानिनिर्यग्रेयानि।द्वारसंमुखतयाचहस्तमात्राद्बहिः पूर्वादिप्रादक्षिण्येक्रमेणअश्वत्थोदुंबरप्लक्षवटशाखा कृतानिपंचषट्सप्तहस्तोच्छ्रायाणिकनिष्ठमध्यमोत्तममंडपेषुहस्तद्वयसपादहस्तद्वयसार्धद्वयविस्तृतानितोरणा निकार्याणि।तोरणानांचोपरिनिर्यक्फलकेषुशैवकर्मत्वान्निम्नकाराः पंचसप्तनवांगुलाःकनिष्ठादिमं

उपेषुमध्येकीलानिरवेयाः।मध्यसूत्रसंपातचतुष्टये-चाष्टहस्ताभ्यत्वारस्तेभाश्वयुजासुतिर्यक्सरंध्रकाष्ठसहि
तानिरवेयाः।मध्यमागेचसौदर्यार्थंसुद्धिनिस्रजेत्।सर्वेस्तंभाः पंचमांशेनसूत्रसंपातस्थानाद्बहिर्निरवेयाः।
मंडपश्चोपरिपरितश्चद्वारवर्जंयत्नियंत्रणादिनिर्मितकटादिभिश्छादनीयइति।मंडपेचमध्यभागेकुंड
कुर्यात्।मध्यमागएवकुंडमितितुसाधितमन्यत्र।तत्रवक्ष्यमाणंग्रहसूत्रहोमाकुतिसंख्याविशेषेणकुंड
परिमाणविशेषाउच्यंते।तत्रएकोनपंचाशदाहुतिपर्यंतंस्थंडिलमेव।तत्र-चाष्टादशांगुलादिपरिमा
णंविशेषाउच्यंते।तत्रैकोनपंचाशदाहुत्यंतमष्टादशांगुलंचतुरस्रंअंगुलोत्सेधंचतुरंगुलोत्सेधंवाका
र्यं।पंचाशदादिनवनवत्याहुतिपर्यंतंमुष्टिमात्रंकुंड।शताधेकोनसहस्रपर्यंतंअरत्निमात्रंकुंड।सह
स्राधेकोनायुतपर्यंतंहस्तमात्रं।अयुताधेकोनलक्षपर्यंतंद्विहस्तं।लक्षाधेकोनदशलक्षपर्यंतंचतु
र्हस्तं।दशलक्षाधेकोनकोटिपर्यंतंषट्हस्तं।कोटिमारभ्याधिकहोमेष्टहस्तं।ततोधिकनरहोमेदशह
स्तमितिकेचित्।कुंडानिब्राह्मणक्षत्रियविशांचतुरस्रवृत्तचंद्रार्धभानिकार्याणि।सर्वकार्यसिद्धिश्चुत्र

DR BHAU DAJI

सुखाप्तिरवैरिनाशश्शांतिश्चमारणंपछेदनंषट्शिरोगनाशश्चाभिचारशांतिरित्यस्तोत्सादनादिदशविध
कामनायांचतुरस्रंयोनिरर्धचंद्रंत्र्यस्रंवृत्तंपंचास्रंषडस्रंचपद्मंचाष्टास्रंसप्तास्रंचैवंचास्त्राणिसर्व
षांकार्याणि।काम्यस्यनित्यनैमित्तकबाधकत्वात्।एतेषांचकरणप्रकारोन्यतोवगंतव्यः।गौरवभयान्नेहोच्यते।
कुंडानांचखननंतत्तद्धोमद्रव्येचदशचतुर्विंशांशैःकार्यं।स्थूलद्रव्येतुविस्तारसमंकार्यं।ततश्चतुर्विंशांशंकंठं
त्यक्त्वानवभिश्चतुर्विंशांशैर्मेखलात्रयंकुर्यात्।तत्रबहिर्मेखलाद्यंगुलोत्सेधविस्तारंद्वितीयातदुपरिद्व्यंगुलोत्से
धविस्तारं।अभ्यंतरातदुपरिचतुरंगुलोत्सेधविस्तारं।ततःपश्चिमेमेखलोपरिकुंडविस्तारार्धदीर्घंकुंडविस्तारत
तीयांशविस्तृतमश्वत्थदलाकारंकुंडंचतुर्विंशांशकृतमेखलायांपश्चिमतःप्रविष्टनालयाकुंडविस्तारेचतुर्विंशांशो
त्सेधांपश्चाद्गतंउन्नतंअग्रपर्यंतमल्पाल्पनिम्नंमेखलोपरिअंगुलोच्चांगुलनीरान्वितंउदयसुतांकुंडमध्येकिंचि
त्प्रविष्टाग्रांगुलमितोरचयेत्।तत्रचद्वितीयमेखलायांपरिधिपरिस्तरणार्थमंतररक्षेत्।ततःकुंडमध्येकुंडंचतुर्विंशां
शहृद्यंशचतुष्टयविस्तृतंतत्कुंडाकारंपद्माकारवानाभिंकुर्यात्।तत्रयोनिकुंडेयोनिपद्मंकुंडेनाभिंचन्द्रकु

र्यात्। इहकुंडमेखलायोन्यादीपक्षांतराणि गौरवभीतेर्नो-च्यंते। कुंडाशक्तौतुएकहस्तादिप्रमाणं-चतुरस्रं तत्तद्धो
मेस्थंडिलं कार्यं। स्थंडिलेचमेखलादिवर्तुलाद्याकारतानभवति।अंगुलोत्सेध-चतुरस्रत्वादिनानेराकास्याद्विरोधा
च्चेतिसंक्षेपः।ततोमंडपांतरीशानभागेरुद्रवेदिकांसग्रहपक्षेचग्रहवेदिकांकुर्यात्। तत्रचदक्षिणतोग्रहवेदिरु
त्तरतोरुद्रवेदिरितिग्रहाणांपूर्वांगत्वेनपूर्वंपूजनीयत्वंपश्चादुदकसंस्थत्वापेक्षणात्। वेदिश्चद्व्यंगुल
व्यंगुलोच्छ्रायद्व्यंगुलविस्तृतवप्रद्वययुतावत्रोपरिसप्तांगुलो-च्छ्रायहस्तविस्तृतासुश्लक्ष्णाकार्या। सर्वशांतिकुंडो
द्विकानाग्रहमखविरहितत्वात्। एवंमंडपकुंडादिनिर्मायतत्पूर्वदेजपात्तेषुप्रेतहोमरुद्रेत्वाचार्यादिपूजांतेशुभे ७
काले मंडपपूजाद्यपयुक्तसंभारान्संभृत्यशुक्लांबरधरःशुक्लमाल्यानुलेपनःसपत्नीकःसाचार्यऋत्विग्यजमा जो४
नोमंगलघोषेणसंपूर्णकलशहस्तःसुवासिनीश्चाग्रतःकृत्वाभद्रकर्णेभिरित्यादिमंत्रघोषेणमंडपंप्रदक्षिणीकृ
त्यपश्चिमद्वारेणप्रविशेत्। ततोमंडपांतःपश्चिमदेशमुपविश्याचम्यदेशकालौस्मृत्वास्वयंब्राह्मणद्वारावारुतस्या
मुकरुद्रस्यजपांगत्वेनसमग्रपक्षेणदशांशेनशतांशेनवावक्ष्यमाणद्रव्येषुअमुकद्रव्येणहब्राह्मणद्वारॉयथाश

वा

क्तिहोमंकरिष्यइतिजपांगेसंकल्पयेत्। ततोगणेशपूजनंमंडपदेवतास्थापनंचकरिष्यइतिसंकल्प्यषोडशोपचारैर्गणा
धिपंसंपूज्यततोगौरसूर्षपैःजपरुद्रहोमरुद्रेचसर्वतोमंडपांतर्विकिरेत्। तत्रमंत्रः। यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्व
दा।स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु।अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशः।सर्वेषामविरोधेनब्रह्मकर्मसमारंभेइति।
ततःपंचगव्येनकुशैःसर्वत्रप्रोक्षणंकार्यं।शुचीवोहव्येतित्वचेनआपोहिष्ठेतित्वचेनच। ततःकृतंजप्तिःस्वस्त्ययनंताप्यमितिमं
त्रद्वयंपठेत्॥ ततोवास्तुपूजनं।आचार्योवास्तुनोमार्थमंडपांतर्नैर्ऋत्येस्थंडिलंविधायतदीशानभागेरुद्रमावाहदेवेदि
धायईशानादिकोणचतुष्के। विरंतुभूतलेनागलोकपालाश्चसर्वशः। मंडपेस्मिंश्चतिष्ठंतुआयुर्बलकराःसदेतिशंकुन्यपये
त्। ततःभूतेभ्यस्त्वथसर्पेभ्योयेचान्येतत्समाश्रिताः। तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तममितिरंकुपार्श्वेमाषसक्तबलिं
दद्यात्। ततोवेधावस्त्रिसुवर्णादिशलाकयाशांता१यशोवती२कांता३विशाला४प्राणवाहिनी५।सती६चसुमना७नंदा८सुभ
द्रा९नवमीमतेतिनवरेखाःकुंकुमादिनाप्रागायताःकृत्वा।हिरण्या१सुव्रता२लक्ष्मी३र्विभूति४र्विमला५प्रिया६जया७कालात्
विशोका८चनवचैवोदगायताःकृत्वामध्यकोष्ठचतुष्टयमेकीकृत्यततःकोणेषुरेखादद्यात्। तेनार्घ्यदानेसंपद्यंते। तत
स्तत्रब्रह्मादीनावाहयेत्। वास्तोश्चतुरस्रंरारीरंदेवाऽआरुक्ष्यसंस्थितारतितत्तद्देवपदेतत्तद्देवावाहनं। तत्रमध्यम

दक्षतुष्के हृदये ब्रह्मा।१।पूर्वपदद्वयेदक्षिणस्तनेअर्यमा२दक्षिणपदद्वयेजठरदक्षिणेविवस्वान्३पश्चिमपदद्वयेजठरवामेमित्रः।४।उदकूपदद्वयेवामस्तनेपृथ्वीधरः।५।आग्नेयपदार्धयोर्दक्षिणोत्तरयोर्दक्षिणहस्तेसावित्रसवितारौ६नैर्ऋत्यपदार्धयोर्दक्षभेदयोर्विबुधाधिपजयौ७वायव्यपदार्धयोर्वामहस्तेराजयक्ष्मा८रुद्रौ९ईशानपदार्धयोरुरोर्भुरवयोरापआपवत्सौ१०ईशानपददक्षिणार्धेपर्जन्यः११स्कंदः१२तद्दक्षिणसार्धपदेदक्षिणनेत्रेपर्जन्यः।१५।तद्दक्षिणपदद्वयेदक्षिणश्रोत्रेजयंतः।१६।तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधः१७।तद्दक्षिणपदद्वयेदक्षिणबाहौसूर्यः१८तद्दक्षिणपदद्वयेदक्षिणबाहावेवसप्तः१९तद्दक्षिणसार्धपदेदक्षिणकूर्परेशक्रः२०तद्दक्षिणाग्नेयकोणपदार्धेदक्षिणप्रबाहावेवकाशः२१तत्पश्चिमार्द्धेदक्षिणप्रबाहावेववायुः२२तत्पश्चिमसार्धपददक्षिणमणिबंधेपूषा२३तत्पश्चिमपदद्वयेदक्षिणपार्श्वेवितथः२४।तत्पश्चिमपदद्वयेदक्षिणपार्श्वएवगृहक्षतः२५तत्पश्चिमपदद्वयेदक्षिणोरौयमः२६तत्पश्चिमपदद्वयेदक्षिणजानौगंधर्वः२७तत्पश्चिमसार्धपदेदक्षिणजंघायांभृंगराजः२८तत्पश्चिमनैर्ऋत्यपदार्धेदक्षिणास्फिचिमृगः२९तदुत्तरार्धपादयोःपितरः३०तदुत्तरसार्धपदेवामस्फीचिदौवारिकः३१तदुत्तरपदद्वयेवामजंघायांसुग्रीवः३२तदुत्तरपदद्वयेवामजानौपुष्पदंतः३३तदुत्तरपदद्वयेवामोरौवरुणः३४तदुत्तरपदद्वयेवामपार्श्वेअसुरः३५तदुत्तरसार्धपदेवामपार्श्वेशेषः३६तदुत्तरवायव्यपदार्धेवाममणिबंधेपापः।३७।तत्राकूपदार्धेवा

मप्रबाहौरोगः३८तत्राकूसार्धपदेवामप्रबाहावेवअहिः३९तत्राकूपदद्वयेवामकूर्परेमुख्यः४०तत्राकूपदद्वयेवामबाहौभल्लाटः४१तत्राकूपदद्वयेवामबाहावेवसोमः४२तत्राकूपदद्वयेवामांसेसर्पः४३तत्राकूसार्धपदेअदितिः४४तत्रागर्धपदेवामनेत्रेदितिः।४५।ततउत्तरेवास्तोष्पतइतिवास्तुः।।ईशानादिविदिक्षुचरकीविदारीपूतनावामश्रोत्रेपूतनापराक्षसी४पूर्वादिदिक्षुस्कंदः१अर्यमा२जृंभकः३पिलिपिच्छः४ततोमंडलादीशानेकुंभंसंस्थाप्यवरुणंतत्रावाह्यपूजयेत्।।ततआचार्योग्निस्थापनाधानाघाज्यक्षागंतंरत्वोदुंबरादियज्ञियदारुसमिधंत्याज्यचरुंतत्रैकमष्टशतमष्टाविंशतिअष्टोवाप्रणवादिनमोंतैस्तन्नामभिर्मंत्रैर्जुहुयात्।नाममंत्रलक्षणंव्रताकूर्मपुराणेप्रणवादिनमोंतयश्चतुर्थ्यंचसन्तमः।देवतायाःस्वकंनाममूलमंत्रःप्रकीर्तितइति।इत्थंप्राणांविकल्पइतिपदार्थादर्शे।ततोवास्तोष्पतेप्रतीतिचनस्तोभिर्वास्तोष्पतेध्रुवास्थूणांतिनिचाऊंवास्तोष्पतयेनमइतिवापंचबिल्वफलानिनहीजानिवाजुहुयात्।ततःस्विष्टकृदादिपूर्णाहुतंकृत्वाब्रह्मादिभ्यःपायसेननाममंत्रैर्बलिंदत्वापावमानेनराक्षोघ्नेनचरुणाघृतेनमंडपंत्रिस्त्र्यावेष्टयित्वाशांतिकलशोदकेनयजमानमभिषिंचयत्नापयेत्।ततोयजमानउत्तरपूजांविधायदेवतांविसृज्यब्राह्मणान्भोजयेदिति।।एतावत्यश

रुद्रपद्धति सूत्रवेष्टनं २ क्षौबलिदानमात्रंदद्यात्॥ततएवशारदातिलकेपायसान्नैर्बलिंरोदित्येवोक्तं॥नहोमादितिसांप्रदायिकाः॥
तस्मिन्यक्षेदेवतापूजनंबलिदानंचेत्यनुष्ठानमिति॥ततःपूर्वस्यांदिशिमंडपद्वारादहिर्हस्तमात्रेवटतोरणमाम्र
त्थंवासुदृढनामकंसुशोभननामकंवास्त्रिशूलचिह्नितंअग्निमीळेपुरोहितमितिपूर्वंनिधायसुदृढतोरणायनमइति
नाममंत्रेणगंधादिनापूजयित्वाचंदनमालापुष्पादिशोभितंकुर्यात्॥राहुहस्तीतन्त्रन्यसेत्॥तत्रैकःकलशः
स्थाप्यःतत्रमंत्राः॥महीद्यौरितिभूमिंस्पृशन्पार्थ्योषधयःसमितियवान्क्षिप्त्वाआकलशेअग्निंघ्रकलशमि
तिवाकलशंस्थाप्यइमंमेगंगइतिजलेनापूर्यगंधद्वारामितिगंधंक्षिप्त्वायाओषधीरितिमवैषधीःक्षिपेत्॥ओषधयःसमिति
यवान्काण्डात्काण्डादितिदूर्वाअश्वत्थेवइतिपंचपल्लवान्॥स्योनापृथिवीतिपंचमृदः॥याःफलिनीरितिफलानि॥हि
रंण्यरूपइतिहिरंण्यंसहिरत्नानीतिपंचरत्नानि॥युवासुवासाइतिवस्त्रेणरक्तसूत्रेणचकंठंवेष्टयेत्॥पूर्णादर्वि
स्फपरिधान्यपूर्णपात्रंन्यसेत्॥तस्मिन्कलशेध्रुवमावाह्यपूजयेत्॥ततोदक्षिणेऔदुंबरंप्लक्षंवाशुभद्रंवि
कटंवास्त्रिशूलचिह्नितंतोरणमिषेत्वोर्जेत्वेतिनिधायनाममंत्रेणपूर्ववत्संपूज्यपूर्ववच्चंदनादिनाचर्चि

तंकृत्वासूर्यमंगारकंतत्रन्यसेत्॥ततःपूर्ववदेककलशस्थापनंतत्रधरामावाह्यपूजयेत्॥ततःपश्चिमेप्लाक्षमौदुंब
रंवासुकर्मसुभीमंवास्त्रिशूलचिह्नितंतोरणमग्नआयाहीतिमंत्रेणनिधायनाम्नापूर्ववत्संपूज्यचंदनेनार्चितंकृत्वा
शुक्रंबुधंचतत्रन्यसेत्॥ततःपूर्ववत्कलशस्थापनंतत्रवाय्वंतिमावाह्यपूजयेत्॥ततउत्तरेवटमाश्वत्थंवासुहोत्रंसुप्र
भंवास्त्रिशूलचिह्नितंतोरणंशंनोदेवीरितिनिधायनाम्नासंपूज्यचंदनादिनार्चितंकृत्वासोमंकेतुंशनीस्तत्रन्यसेत्॥
ततःपूर्ववत्कलशस्थापनंतत्रविघ्नराजावाह्यपूजयेत्॥ततःपूर्वद्वारेकलशद्वयंनिदध्यात्प्रतिकलशंमंत्रावृत्तिः॥
ऐरावतंकलशद्वयेन्यस्यपूजयेत्॥ततऋग्वेदादिनावृत्विजौपूर्वद्वारेशांतिसहजपार्थत्वेनत्वामहंवृणेइति॥ऋग्वे
दःपद्मपत्रालोगायत्रःसोमदेवतः॥अत्रिगोत्रस्तावित्रेदृत्विक्कंमेमरेभवेतिप्रत्येकंवृत्वा॥अग्निमीळइतिप्रत्येकंपूजयेत्॥
ततःसहस्राक्षमैरावतसंस्थितंपीतकिरीटकुंडलधरंदक्षिणवामकरस्थवज्रोत्पलमिंद्रंध्यात्वा॥एह्येहिसगंधादिभिः+
र्वमिरसिद्धसाध्येराभिष्टुतोवज्रधरामरेशासेवीज्यमानोप्सरसांगणेनरक्षाधरंनोभगवंनमस्ते॥भोरंद्रेहागछेहनिष्ठे
तींद्रसांगंसपरिवारंसायुधंससक्तिकंद्वारकलशेआवाह्यततस्त्वातारमिंद्रमितींद्रंपूजयेत्॥आशुःशिशानइतिपीतां

पताकांपीतंध्वजंचहयमपिपंचहस्तंदंडमुच्छ्रयेत्।द्विहस्तदीर्घविंशत्यंगुलविस्ततंध्वजपताकालक्षणं॥ इदं वोविश्व
तस्परीतिवामंत्रः॥ ततइंद्रः सुरपतिःश्रेष्ठोवज्रहस्तोमहाबलः॥शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमइतिनत्वाततइंद्राय
सांगायसपरिवारायसायुधायसशक्तिकायैतमाषभक्तबलिंसमर्पयामीतिसमर्पयेत्।ततआचम्याग्नेयेगत्वापूर्ववत्क
लशंसंस्थाप्यपुंडरीकमंत्रंचपूजयित्वा।छागस्थंरक्तंदक्षिणवामकरद्वयधृतशक्तिकमुंडलुंयज्ञोपवीतिनमग्निंध्या
त्वाॐ एह्येहिसर्वामरहव्यवाहसप्तार्चिषंरोहितोभिजुष्ट।तेजोबलालोकगणेनसार्धंममाध्वरंपाहिकवेनमस्ते।भोअ
ग्ने रक्षागणछेहतिष्ठेतिसांगमित्याद्यग्निकलशेआवाह्यरक्तांपताकांध्वजंचाग्निंदूतमित्युच्छ्रयेत्।ततस्त्वंनोअग्नइतिमंत्रे
णाग्निंगंधादिभिःपूजयित्वाआग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययः॥धूमकेतुरितिध्यात्वाग्नयइत्यादिबलिंसमर्पयेत्॥ततआचम्यदक्षिणेगत्वाप्रतिहारशरावंचंदनोदकादिपुंपूर्ववन्मंत्रैःकलशद्वयंस्थापयि
त्वावामनंनामकंदिग्गजंतत्रन्यस्यपूजयेत्।ततोयजुर्वेदिनाऋत्विजैवदक्षिणद्वारेशांतिजपार्थंनत्वामहंवृणइतिवाक्यंवृत्वा
यजुर्वेदस्त्वेष्टोभोविष्णुदैवतः।काश्यपेयस्त्वंविप्रेंद्रऋत्विक्कंमेमरेभवेतिप्रेषेकंटत्वारक्तवर्णेत्वेतिगंधादिभिःपूजयेत्॥

ततोमाहिषारूढंध्वतदंडपाशदक्षिणवामकरंकृष्णांजनचयोपममहिषसमलोचनंयमंध्यात्वाॐएह्येहिवैवस्वतधर्मराज
सर्वामरैरर्चितधर्मकर्त्तःसुप्रासुप्तानंदशुचामधीशशिवायनःपाहिमरवंनमस्तेभोयमरक्षागणछेहतिष्ठेतिसांगादिमावाह्यरक्षां
पताकांध्वजंचायंगौरितिमंत्रेणोच्छ्रयेत्।ततोयमायसोममितिगंधादिभिःपूजयित्वा।महामहिषमारूढंदंडहस्तंमहाबलं।आ
वाहयामियमेहीन्पूजेयंप्रतिगृह्यतामितिनत्वासांगायेत्यादिबलिंसमर्पयेत्।ततआचम्यनैर्ऋत्यांपूर्ववत्कलशौसंस्थाप्यकुमु
दंदुर्जयंचपूजयित्वा।ततोनरारूढंमहाकायंरक्तहस्तंमहाबलं॥नीलंबहुराक्षससेवितंपीताभरणभूषितंनिर्ऋतिंध्यात्वाॐ
एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंवृतः।ममाध्वरंपाहिपिशाचनाथलोकेश्वरस्त्वंभगवंनमस्ते।भोनिर्ऋतेरक्षागणछेह
तिष्ठेतिसांगादिमावाह्यनीलंपताकांनीलंध्वजंचमोक्षणइतिमंत्रेणोच्छ्रयेत्।असुन्वंतमितिमंत्रेणमोक्षणइत्यनेनवानिर्ऋ
तिंगंधादिभिःसंपूज्यनिर्ऋतिंरक्तवर्णहस्तंचसर्वलोकैकपावनं।आवाहयामियमेहीन्पूजेयंप्रतिगृह्यतामितिनत्वासांगा
येत्यादिनिर्ऋतयेएतंमाषभक्तबलिंसमर्पयेत्।ततआचम्यपश्चिमद्वारेद्वारशरावयोःकलशौसंस्थाप्यअंजनाख्यंदिग्ग
जंन्यस्यपूजयेत्॥ततःसामवेदिनाऋत्विजौपश्चिमद्वारेशांतिस्तज्जपार्थंनत्वामहंवृणइति।सामवेदस्त्वंपिंगाक्षो

जामतः शक्रदैवतः।भारद्वाजस्कविप्रेंद्रऋत्विक्कंमेमरवेभवेतिप्रत्येकंदत्वाग्नआयाहीतिगंधादिभिः पूजयेत्।ततो मकरस्थंपाशहस्तंशुक्लवर्णंकिरीटधारिणंवरुणंध्यात्वा।ॐ एह्येहियादोगणवारिधीनांगणेनपर्जन्यसहायकारिभिः।विद्याधरेंद्रामरसेव्यमानपाहित्वमस्मान्सगवंनमस्ते।।भोवरुणइहागच्छेहतिष्ठेतिसांगादिमावाह्यश्वेतांपताकांध्वजं चेममेवरुणेलक्षयेत्।तन्वायामीतिगंधादिभिर्वरुणंपूजयित्वा।पाशहस्तंचवरुणमर्णसांपतिमीश्वरं।आवाहयामियत्रेमेवरुणायनमोनमइतिनत्वासांगायेत्यादिवरुणायबलिंसमर्प्यचामेत्।ततोवायव्यांपूर्ववत्कलशंनिधायतत्रपुष्पदंतंसिद्धार्थंचसंपूज्यामृगाधिरूढंधूम्रवर्णंचित्रांबरधरंयुवानंव्यजनांकुशदक्षिणवामहस्तद्वयंवायुंध्यात्वा।ॐ एह्येहियत्रेममरक्षणायमृगाधिरूढःसहसिद्धसंघैः।प्राणाधिपःकालकवेःसहायइहागच्छपूजांभगवंनमस्ते।भोवायोइहागच्छेहतिष्ठेतिसांगादिमावाह्यधूम्रांपताकांध्वजंचवायोशतमितिमंत्रेणन्यसेत्।तववायवेतस्थातृतिवायुंगंधादिभिरभ्यर्च्य।वायुमाकाशगंचैवपवनंवेगवद्बलिं।आवायोहेमियत्रेमेस्मिन्पूजेयंप्रतिगृह्यतां।अनाकारोमहौजाश्चयश्चादृष्टगतिर्दिवि।तस्मैपूज्यायजगतोवायवेहंनमामिचेतिनत्वासांगायेत्यादिबलिंसमर्प्यचाग्नेयद्वारेकलशद्वयंप्राग्वत्स्थापयित्वा

सार्वभौमंदिग्गजंन्यस्यपूजयेत्।अथर्ववेदिनाद्वत्विजोऽनरद्वारेशांतिजपार्थंनत्वामहंवरुणे।इहनेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः।वैशंपायनविप्रेंद्रऋत्विक्कंमेमरवेभवेतिप्रत्येकंदत्वाशंनोदेवीरितिगंधादिभिः पूजयेत्।ततोनरयुतविमानस्थंकुवलयहारकेयूररुचिरंवरगदाधरदक्षिणवामभुजद्वयमुकुटिनंमहोदरंमहाकायंहरितवर्णंकुबेरंध्यात्वाॐ एह्येहियक्षेश्वरयत्तरक्षाविधेहिनक्षत्रगणेनसार्धं।सर्वौषधीभिः पितृभिः सहेवगृहाणपूजांभगवंनमस्ते।भोसोमेहागच्छेहतिष्ठेतिसांगादिमावाह्यहरितांपताकांध्वजंचाप्यायस्वेतिन्यस्यसोमोधेनुमितिंद्वयंसोमेतिवापूजयित्वा।सर्वनक्षत्रमध्येतुसोमोराजाव्यवस्थितः।तस्मैसोमायदेवायनक्षत्रपतयेनमइतिनत्वासांगायेत्यादिबलिंसमर्प्यचामेत्।ततनरशाव्यंगत्वापूर्ववत्कलशंनिधायतत्रसुप्रतीकंदिग्गजंमंगलंचसंपूज्य।वृषारूढंदक्षिणवामहस्तयोर्वरत्रिशूलधरंत्रिनेत्रंशुक्लवर्णमीशानंध्यात्वाॐ एह्येहिविश्वेश्वरमस्त्रिशूलकपालखट्वांगधरेणसार्धं।लोकेनयक्षेश्वरयत्तसिध्यैगृहाणपूजांभगवंनमस्ते।भोरुद्रेशानेहागच्छेहतिष्ठेतिसांगादिमावाह्यश्वेतांसर्ववर्णांवापताकांध्वजंचाभित्वादेवसवितरित्यृचायेत्।ततस्तमीशानमितिगंधादिभिरभ्यर्च्य।वृषस्कंधसमारूढंशूलहस्तंस्त्रियंबनः।आवाहयामियमेस्मिन्पूजेयं

प्रतिगृह्यतां। सर्वाधिपोमहादेवईशानःशुक्लईश्वरः।शूलपाणिर्विरूपाक्षस्तस्मैतुभ्यंनमोनमइतिनत्वाईशानायेत्यादि
बलिंसमर्प्यचम्य।।ततईशानपूर्वयोर्मध्येऽधउदिश्यअनंतशयनासीनंफणासप्तकमंडितं।पद्मशंखचक्रोर्ध्वाधोदक्षि
णकरहृयंचक्रगदोर्ध्वाधोवामकरहृयंनीलवर्णमनंतंध्यात्वाॐएह्येहिपातालधरामरेंद्रनागांगनाकिंनरगीयमान।।
यत्तोरगेंद्रामरलोकसंघैरनंतरक्षाधरमस्मदीयंप्रभोअनेतइतागछेतिसांगादिमावाह्यमेघवर्णंश्वेतंवाफ
ताकांध्वजंचाप्यगोरितिमंत्रेणोद्धृत्यायंगोरितिमंत्रेणशोषंगंधादिभिरभ्यर्च्यायोसावनंतरूपेणब्रह्मांडंसचराचरं
पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमइतिनत्वाअनंतायेत्यादिबलिंसमर्प्यचामेत्य।।नैर्ऋत्यपश्चिमयोर्मध्येवानंत
पूजा।।ततःपश्चिमनैर्ऋत्ययोर्मध्येऊर्ध्वमुद्दिश्यासस्त्रकुशमुष्टिधरोर्ध्वाधोदक्षिणकरस्रुवकमंडलुधरोर्ध्वाधोवामक हृयं २
रहृयंचतुर्मुखंश्मश्रुजटामंडितंहेमवर्णंब्रह्माणंध्यात्वाॐएह्येहिसर्वाधिपतेसुरलोकेनसार्धंपितृदेवताभिः।
सर्वस्यधातास्यमितप्रभावोविशाधरेनःसततंशिवायभोब्रह्मन्नेहागछेत्याघारावाघारकांपताकांध्वजंचब्रह्मजज्ञान
मितिन्यस्यतेनैवब्रह्माणंगंधादिभिरभ्यर्च्यापद्मयोनिश्चतुर्मूर्त्तिर्वेदावासःपितामहः।यत्तोध्वजश्चतुर्वक्त्रस्तस्मैनित्यं

नमोनमइतिनत्वासांगायेत्यादिब्रह्मणेएतंमाषभक्तबलिंदद्यात्।अन्येतुस्योनापृथिवीतिमंत्रेणपृथिवींपूजयंति।तेनै
वध्वजपताकास्थापनमपिकुर्वंति।रूपनारायणमतेईशानपूर्वयोर्मध्येब्रह्मपूजनं।ततआचम्यमंडपमध्येअष्टहस्तं
द्वादशहस्तंदीर्घस्त्रिहस्तविस्ततोमहाध्वजोविचित्रवर्णइंद्रस्यवज्रइतिमंत्रेणस्थाप्यःब्रह्मजज्ञानमितिचतत्रब्रह्मपूज
नंकार्यं।ततोमंडपबाह्यशालाभ्येषुसर्वेभ्योदेवेभ्योनमः।एतेपन्नगेभ्योनमः।वंशेषुकिंनरेभ्योनमः।इतिपूजयेत्।ततोमंड
पाद्बहिःपूर्वस्यांदिशिकिंचिद्भूमिमुपलिप्यतत्रोपविश्यत्रैलोक्येयानिभूतानिस्थावराणिचराणिच।ब्रह्मविष्णुशिवैःसा
र्धंरक्षांकुर्वंतुतानिमे।देवदानवगंधर्वायक्षराक्षसपन्नगाः।ऋषयोमुनयोगावोदेवमातरएवच।सर्वेममाध्वरेरक्षांप्रकुर्व
न्तुसदान्विताः।ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालगणैःसह।रक्षंतुमंडपंसर्वेभ्यंतुरक्षांसिसर्वतः।त्रैलोक्यवस्थितेभ्यःस्थावरेभ्यो
भूतेभ्योनमः।त्रैलोक्यस्थेभ्यश्चरेभ्योभूतेभ्योनमः।ॐब्रह्मणेनमः।विष्णवेनमः।शिवायनमः।देवेभ्योनमःगंधर्वेभ्योन
मः।यक्षेभ्योनमः।राक्षसेभ्योनमः।पंनगेभ्यो॰ऋषिभ्यो॰मनुष्येभ्यो॰गोभ्यो॰देवमातृभ्यो॰इतिप्रत्येकंसंपूज्यपुष्पादि
नापूर्वमंत्रैरेवतस्यांभूमौएक्यएवमाषभक्तबलिंदद्यात्।ततोयजमानःसाचार्यःऋत्विक्प्रक्षालितपाणिपादआ

-वांतः प्राग्द्वारेणमंडपंप्रविशेत्। इतिमंडपपूजा॥ ततोयजमानोन्यायतनाद्दक्षिणतउपविशेत्। आ-चार्यस्तु कुंडपश्चिमतउपविश्याचम्यप्राणानायम्यामुककर्मण्यग्निप्रतिष्ठांकरिष्येतदंगतयासंमार्ज। नमेरवलायोनिदेवतास्थापन पूजादिकरिष्यइतिसंकल्प्यान्यायतनंसंमृज्यकुशोदकेनप्रोक्ष्यइदंविष्णुरितिमंत्रेणोपरिमेरवलायांश्वेतवर्णलक्षता यांविष्णुमावाह्यपूजयेत्। मध्यमेरवलायांरक्तवर्णलक्षतायांब्रह्मजज्ञानमितिब्रह्माणं। अधोमेरवलायांकृष्णवर्णलक्षता यांकद्रुदायेतिरुद्रं। पोन्यांरक्तवर्णलक्षतायांगोरीर्मिमायेतिगौरीं॥ स्वस्वारवोक्तमार्गेणाग्निंप्रतिष्ठाप्यग्रहवेदिकायास्व र्वतोनंदिरन्यब्रह्मादीस्थापयेत्। नद्यथा। प्राग्दी-र्घायतारेखाःकुर्यादेकोनविंशतिः॥ खंडैर्दक्षिणपदाकोणेश्रृंखलापं २२ चभिःपदैः॥१॥ एकादशपदावल्लीसप्तनवभिःपदैः॥ चतुर्विंशत्पदाबाह्यपरिधिर्विंशतिःपदैः॥२॥ मध्येवोऽग्निकोष्ठःषण्णवतिदलस्तत्रासितेंदुःश्रृंखलालक्षावल्लीनीलेनपूरयेत्। सदारुणासितावापीपरिधिःपीतवर्णकः। बाह्यांतर दलाश्वेताकर्णिकापीतकर्णिका॥३॥ परिध्यावेष्टितंपद्मंबाह्येसत्वरजस्तमैः। नमध्येस्थापयेद्देवान्ब्रह्मायांश्चसुरा सुरान्॥५॥ यथा। मध्येब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्। ब्रह्मस्थापनेपूजनेचविनियोगः। ॐ ब्रह्मजज्ञानप्र०।

भोब्रह्मन्ग्रहागच्छग्रहांतिष्ठपूजांगृह्णसुप्रसन्नोवरदोभव॥ एवमुत्तरत्र। उत्तरेसोमः। आप्यायस्वसमेतुते सोमोगायत्री। ॐआप्यायस्व०।२। ईशान्यांईशानः। अभित्वाशूरनोनुमोपरईशानोगायत्री। ईशानोवा ॐ अभि त्वा०३। पूर्वेरुद्रः। इंद्रंवोमधुछंदाइंद्रोगायत्री। इंद्रोवा ॐ इंद्रोव०४। आग्नेयामग्निः। अग्निंकाण्वोमेधातिथिरग्निर्गायत्री अग्न्या ॐ अग्निंदूतं०५। दक्षिणेयमः। यमायसोमंयमोयमोनुष्टुप्। यमावा ॐ यमाय०६। निर्ऋत्यांनिर्ऋतिः। मेषुणोघो रः कण्वोनिर्ऋतिर्गायत्रीनिर्ऋत्या ॐ मेषुणः०७। पश्चिमेवरुणः। तत्त्वायामिगुनःशेपोवरुणस्त्रिष्टुप्। वरुणा ॐ तत्त्वायामि०८। वायव्यांवायुः। वायोशतंगौतमोवामदेववायुरनुष्टुप्। वायवा ॐ वायोश०९। वायुसोममध्येअष्टौवसवः। ज्मयाअत्र मेत्रावरुणोवसवस्त्रिष्टुप्। वसवा ॐ ज्मयाअत्र०१०। सोमेशानमध्येएकादशरुद्राः। आरुद्रासःस्यावाश्वएकादशरुद्रा जगती। ॐ आरुद्रास०॥११॥ ईशानेंद्रयोर्मध्येद्वादशादित्याः। त्वंनुसोमदेवस्यद्वादशादित्यागायत्री। ॐ त्वंनुसो०१२ इंद्राग्न्योर्मध्येश्विनौ। अश्विनावर्त्तिराकुरंगपोगौतमोश्विनावनुष्टुप्। ॐ अश्विना०१३ अग्नियममध्येविश्वेदेवाः स

पैत्रका:।ओमासोमधुघंदाकिश्वेदेवागायत्रीॐओमास॰।१४।यमनिर्ऋतिमध्येसप्तयक्षा:।आभित्यंदेवंगोतमोवामदे
वःसप्तयक्षाःप्रकृतीॐअभित्यंदे॰।१५।निर्ऋतिवरुणमध्येभूतनागाःआयंगौःसार्पराज्ञीसर्पागायत्रीॐआयंगौः॰१६।।
वरुणवायुमध्येगंधर्वाप्सरस:।अप्सरसामेनकाकृष्णगोगंधर्वाप्सरसोनुष्टुप्।ॐअप्सरसा॰१७ ब्रह्मसोममध्येस्कंदंदीक्ष
रुद्रंकालंवायदक्रंदोदीर्घतमास्कंदग्निष्टुप्।यदक्रंदः॰१८ कडुदायेतिघोरःकण्वोनेदीश्वरागायत्री।ॐकडु
दाय॰१९ कुमारंमाताबुधगविष्ठिरोरुद्रःत्रिष्टुप्।ॐकुमार॰२० ऋषभमृषभोवैराजोमृहाकालोनुष्टुप्ऽॐऋषभं॰२१
ब्रह्मेशानमध्येदक्षः।अदितिर्नोयोबहस्पतिर्दक्षोनुष्टुप्।ॐअदितिर्नो॰२२ ब्रह्मेंद्रमध्येदुर्गान्त्रिष्टुचाताग्निवर्णासौभरिर्दु
र्गात्रिष्टुप्।ॐतामग्निवर्णा॰२३ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री।ॐइदंविष्णु॰२४ ब्रह्माग्निमध्येस्वधाउदीरतांशारद्वः
स्वधात्रिष्टुप्।उदीरता॰२५ ब्रह्मयममध्येमित्ररोगाःपरमृत्योमृकुसिकोमृत्युरोगास्त्रिष्टुप्।ॐपरमृत्यो॰२६ ब्रह्मनिर्ऋ
तिमध्येगणपतिः।गणानांत्वाशौनकोगृत्समदोगणपतिर्जगती।ॐगणानां॰२७ ब्रह्मवरुणमध्येअपःशंनोदेवीरां
बरीषःसिंधुद्वीपआपोगायत्री।ॐशंनोदेवी॰२८ ब्रह्मवायुमध्येमरुतःमरुतोयस्यराकुर्गणोगौतमोमरुतोगायत्री।ॐम

रुतोय॰२९ ब्रह्मणःपादमूलेकर्णिकायांपृथ्वीस्योनाकाण्वोमेधातिथिर्विष्णुर्गायत्री।ॐस्योनापृथि॰३०।।तत्रैवगंगादिनद्यःम
त्तसागराश्च।इममेगंगेयमुनेसरस्वतीशुतुद्रीस्तोमंसचतापरुष्ण्यासुषोमयाऽर्जीकीयेशृणुह्यासुषोमयाजगती।इंममेगंगेय॰३१।धाम्नोधाम्नोगोतमोवामदेवःसप्त
सागराबृहतीॐधाम्नोधाम्नोराजं॰३२।।तदुपरिमेरुंनाममंत्रेणपूजयेत्।बाह्यपरिधौसोमादिसंनिधौक्रमेणआयुधानि।
सोमसंनिधौगदा।ईशानसंनिधौत्रिशूलः।२वज्रं३शक्तिः४दंडः५खड्गः६पाशः७अंकुशः८तद्बाह्येउत्तरेगौतमः१ईशानादिक्र
मेणभरद्वाजः२विश्वामित्रः३कश्यपः४जमदग्निः५वसिष्ठः६अत्रि:७अरुंधती८तद्बाह्येपूर्वादिक्रमेणऐंद्री१कौमारी२
वाराही३वाराही४चामुंडा५वैष्णवी६माहेश्वरी७वैनायकी८इत्यष्टौशक्तयः।एताःस्वस्वमंत्रेर्नाममंत्रेर्वास्थापयित्वापूजयेत्।
तत्तन्मंत्रेर्नामंत्रैर्वाप्रत्येकंदशदशाहुतीर्हुत्वाउपहारंनिवेदयेत्।क्षीरोदनंब्रह्मणे।घृताभ्युदकाभिमंत्रितमिंद्रा
यआज्योदनमग्नये।माषान्नंयमाय।दध्योदनंनिर्ऋतये।नवनीतोदनंवरुणाय।यवोदनंवायवे।प्रेयंयवो
दनंसोमाय।गवीक्षकमीशानाय।अन्येभ्योयथालाभंसर्वेभ्योवानैवेद्यैरोषानेनादिग्बलयःकार्याः।ततोवैद्यानवंवस्त्रं
निधायतत्रकर्णिकामध्येपद्मंनिधायतत्रग्रहमंडलानिविरिच्यनवग्रहदेवतास्थापनंकुर्यात्।अत्रायप्रयोगः।।

अथेत्यादि॰ग्रहपीठदेवतास्थापनंकरिष्ये। प्रणवस्यब्रह्माऋषिः परमात्मादेवता। गायत्रीछंदः। व्याहृतीनांऋषेणजमदग्नि भरद्वाजभृगवोऋषयः।अग्निर्वायुःसूर्यो देवताः। देवीगायत्रीदेवीउष्णिग्देवीबृहत्यश्छंदांसि।सूर्यायावाहनेविनियोगः। केचि त्तत्तन्मंत्रावप्यावाहनेआहुः। तत्रग्रहपीठमध्येवर्तुलेद्वादशांगुलेमंडलेप्राग्वंसूर्यंरक्तपुष्पाक्षतैः।आकृष्णेनहिरण्य स्तूपःसवितात्रिष्टुप्। सूर्यावाह॰ओंआकृष्णेनर॰भूर्भुवःस्वः कलिंगदेशोद्भवकाश्यपसगोत्रसूर्येहागच्छेहागच्छेत्यावाह्यइहति ष्ठेतिस्थापयेत्। ततआग्नेयेचतुर्वेशांगुलेमंडलेप्रत्यग्वंसोमंश्वेतपुष्पाक्षतैः।आप्यायस्वगौतमःसोमोगायत्री।सो मावाह॰ओंआप्यायस्व॰भूर्भुवःस्वःयमुनातीरोद्भवात्रेयसगोत्रसोमेहागच्छेहतिष्ठेतिस्थापयेत्। २। ततोदक्षिणेत्र्यंगुले त्रिकोणेमंडलेदक्षिणमुखंभौमंरक्तपुष्पाक्षतैः।अग्निर्मूर्धेतिरूपोगारकोगायत्रीअंगारकावा॰ओंअग्निर्मू॰भूर्भुवःस्वः अवंतीसमुद्भवभारद्वाजसगोत्रभौमेहागच्छेहतिष्ठेतिस्थापयेत्। ३। ततईशान्येबाणाकारेचतुरंगुलेमंडलेउदग्वंबुधंपी तपुष्पाक्षतैः।उद्बुध्यध्वंबुधःसौम्योबुधस्त्रिष्टुप्। बुधावा॰ओंउद्बुध्यध्वं॰भूर्भुवःस्वःमगधदेशोद्भवात्रेयसगोत्रबुधे हागच्छेहतिष्ठेतिस्थापयेत्॥४॥ततउत्तरेदीर्घचतुरस्रेषडंगुलेमंडलेउदग्वंबृहस्पतिंपीतपुष्पाक्षतैः। बृहस्पतेर

त्समदोबृहस्पतिस्त्रिष्टुप्। बृहस्पत्यावा॰ओंबृहस्पत॰भूर्भुवःस्वःसिंधुदेशोद्भवांगिरसगोत्रबृहस्पतेहाग॰५ ततःपूर्वेपंचको णेचांगुलमंडलेप्राग्वंशुक्रंश्वेतपुष्पाक्षतैः।शुक्रःपाराशरःशुक्रोद्विपदाविराट्शुक्रावा॰ओंशुक्रःशु॰भूर्भुवःस्वःभोज कटदेशोद्भवभार्गवसगोत्रशुक्रेहाग॰६ ततःपश्चिमेधनुराकारेत्र्यंगुलेमंडलेप्रत्यग्वंशनिंकृष्णपुष्पाक्षतैः।शमग्निरग्नि वि ष्टिःशनिरुष्णिक्।शन्यावा॰ओंशमग्नि॰भूर्भुवःस्वः सौराष्ट्रदेशोद्भवकाश्यपसगोत्रशनेश्वरेहा॰७ ततोनैर्ऋत्येश्रूपाकारे द्वादशांगुलेमंडलेदक्षिणमुखंराहुंकृष्णपुष्पाक्षतैः।कयानोवामदेवोराहुर्गायत्री।राहुर्वा॰ओंकयान॰भूर्भुवःस्वः राठिना पुरोद्भवपैठीनसगोत्रराहोहाग॰८ ततोवायव्येध्वजाकारेषडंगुलेमंडलेदक्षिणमुखंकेतुंधूम्रपुष्पाक्षतैः।केतुंमहि छंदाःकेतुर्गायत्री।केत्वावा॰ओंकेतुंकृ॰भूर्भुवःस्वःअंतर्वेदिसमुद्भवजैमिनिसगोत्रकेतोहागा॰९।सर्ववादित्यादिसु रवाःस्थाप्याः॥अथाधिदेवताःसर्वाःश्वेतपुष्पाक्षतैःस्थापयेत्॥ ॥त्र्यंबकंवसिष्ठरुद्रोनुष्टुप्।ईश्वरावा॰ओंत्र्यंबकं॰भूर्भुवःस्वः ईश्वरेण॰सूर्यदक्षिणपार्श्वेईश्वरायनमः ईश्वरंआवाहयामि॥ गौरीर्मिमायदीर्घतमाउमाजगतीउमावा॰ ओंगौरीर्मिमाय॰भूर्भुवःस्वःउमेन॰सोमदक्षिणपार्श्वेउमा॰२ यदक्रंदोदीर्घतमाःस्कंदस्त्रिष्टुप्।स्कंदावा॰ओंयदक्रं॰

भूर्भुवः स्वः स्कंदेहागछे०भौमदक्षिणपार्श्वेस्कंदा०२विष्णोर्नुकंदीर्घतमानारायणस्त्रिष्टुप्नारायणा०ॐविष्णोर्नु०भूर्भुवः स्वःनारायणेहाग०बुधदक्षिणपार्श्वेनारायणाय०४ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्ब्रह्मावा०ॐब्रह्मजज्ञानं०भूर्भुवः स्वःब्रह्मन्निहा०बृहस्पतिदक्षिणपार्श्वेब्रह्मणेना०५इंद्रंवोमघछंदाइंद्रोगायत्रीइंद्रावा०ॐइंद्रंवो०भूर्भुवः स्वःइंद्रेहा०शुक्रदक्षिणपार्श्वेइंद्राय०६यमायसोमंयमोयमोनुष्टुप्यमावा०ॐयमाय०भूर्भुवः स्वःयमेहा०शनिदक्षिणपार्श्वेयमाय०७मोषुणोघोरःकण्वःकालोगायत्रीकालावा०ॐमोषुणः०भूर्भुवः स्वःकालेहाग०राहुदक्षिणपार्श्वेकालाय०८उषोवाजंप्रस्कण्वश्चित्रगुप्तोबृहतीचित्रगुप्तावा०ॐउषोवाजं०भूर्भुवः स्वःचित्रगुप्तेहा०केतुद०चित्रगुप्ताय० ७६

९ ततःशुक्लपुष्पतंडुलैःसर्वाःप्रत्यधिदेवताः अग्निंकाण्वोमेधातिथिरग्निर्गायत्र्यग्न्यावा०ॐअग्निंदूतं०भूर्भुवस्वःअग्नेरहा०सूर्यवामपार्श्वेअग्नये०१अप्सुमेसोमोधातिथिरापोनुष्टुब्अपा०ॐअप्सुमे०भूर्भुवः स्वरापरहा०सोमेवामपार्श्वेअद्भ्यो० २स्योनापृथिवीधातिथिर्भूमिर्गायत्रीभूम्यावा०ॐस्योनापृ०भूर्भुवस्वःभूमेरहा०भौमवामपार्श्वेभूम्ये०३इदंविष्णुर्मेधातिथिर्भूमिर्गायत्रीभूम्यावा०ॐइदंवि०भूर्भुवः स्वःविष्णोरहा०बुधवामपार्श्वेविष्णवे०४इदमहंनिगलस्यमदइंद्रस्त्रिष्टुप्इंद्रावा०ॐइं

इन्द्रेषा०भूर्भुवः स्वरिंद्रेहा०गुरुवामपार्श्वेइंद्राय०५इंद्राणीरघाकपिरिंद्राणीपंक्तिःइंद्राण्या०ॐइंद्राणी०भूर्भुवस्वरिंद्राणीहा०शुक्रवामपार्श्वेइंद्राण्यै०६प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्प्रजापत्या०ॐप्रजापते०भूर्भुवः स्वःप्रजापतेहा०शनिवा०प्रजापतये०७आयंगौःसार्परराज्ञिःसर्पागायत्री।सर्पा०ॐआयंगौः०भूर्भुवः स्वःसर्पेहा०राहुवा०सर्पेभ्यो०८ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्।ब्रह्मावा०ॐब्रह्मज०भूर्भुवः स्वःब्रह्मन्निहा०केतुवा०ब्रह्मणे०९ततःशुक्लपुष्पतंडु

एवं लैःविनायकादिपंचदेवताःस्थापयेत्॥गणानांत्वाशौनकोगृत्समदोगणपतिर्जगती।राहूनेरतोगणपतिं१।जातवे

दसेकश्यपोदुर्गात्रिष्टुप्।शनेरुत्तरतोदुर्गां२तवद्वायोव्यश्वोगिरसोवादुर्गायत्रीरक्षरतोवायुं३।आदित्सआकाशोगा

यत्री।राहोर्दक्षिणतआकाशं४इषोदुषाप्रस्कण्वोग्निर्नोगायत्रीकेतोर्दक्षिणतोग्निर्नःस्थापयेत्५यद्वाविनायकादीन्पंचो

नरतःस्थापयेत्।उत्तरेवास्तोष्पतिंक्षेत्राधिपतिंचावाहयेत्इत्येके।क्षेत्रस्यपतिनावामदेवःक्षेत्राधिपतिरनुष्टुप्१वा

स्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्।ततइंद्रादिलोकपालान्सूर्यादिग्रहांश्चस्थापयेत्।तत्रमंत्राः।इंद्रंविश्वाअवीवृधन्छं

दसइंद्रोनुष्टुप्१अग्निंकाण्वोमेधातिथिरग्निर्गायत्री२यमायसोमंयमोयमोनुष्टुप्३मोषुणोघोरःकण्वोनिर्ऋतिर्गा

यत्री॥४॥त्वंनोअग्नेवामदेवोवरुणस्त्रिष्टुप्॥५॥तववायोव्यश्वांगिरसोवायुर्गायत्री॥६॥सोमोधेनुंराकुणोगोतमःसोमस्त्रि
ष्टुप्॥७॥तमीशानंगौतमईशानोजगती॥८॥नाममंत्रेश्वरवेः पूर्वेशेषं।सोमस्याग्नेवासुकिं।भौमाग्नेतप्तकं।बुधोत्तरेकर्की
टकं।बृहस्पतिसमीपेपद्मं।शुक्रोत्तरेमहापद्मं।शनिपश्चिमेइंद्रनीलं।राहोःपुरतःकंबलं।केतोःपुरतःकुलिकं।ततोब
हिर्ग्रहेपूर्वेअश्विन्यादिसप्तनक्षत्राणि।विष्कंभादिसप्तयोगाः।बवबालवकरणे।सप्तद्वीपानि।ऋग्वेदश्च।दक्षिणे
पुष्यादिसप्तनक्षत्राणि।धृत्यादिसप्तयोगाः।कौलवतैतिलेकरणे।सप्तसागराः।यजुर्वेदश्च।पश्चिमेस्वात्यादिसप्त
नक्षत्राणि।वज्रादिसप्तयोगाः।गरवणिजेकरणे।सप्तपातालानि।सामवेदश्च।उत्तरेअभिजिदादिसप्तनक्षत्रा ७
णि।साध्यादिषड्योगाः।विष्टिकरणं।भूराद्याः सप्तलोकाः।अथर्ववेदश्च।वायव्येऋवः।सप्तऋषयश्च।ततोयथा
वकाशंगंगादिसप्तसरितः।सप्तकुलाचलाः।अष्टोवसवः।एकादशरुद्राः।द्वादशादित्याः।एकोनपंचाशन्मरुतः।
षोडशमातरः।षड्ऋतवः।द्वादशमासाः।द्वेअयने।पंचदशतिथयः।षष्टिसंवत्सराः।सुपर्णाः।नागाः।सर्पाः।यक्षाः।
गंधर्वाः।विद्याधराः।अप्सरसः।रक्षांसि।भूतानि।मनुष्याइत्येतेस्थाप्यानि।अत्रनवग्रहाएवस्थाप्याइत्येकःपक्षः।

विनायकादिपंचलोकपालांताद्वात्रिंशद्देवतारूपःअपरःअष्टौदिक्पालसहितारत्नन्यः।शेषादिमनुष्यांताएताइतिवा।एते
षुपक्षेषुबहुत्वात्पीयत्वेनफलतारतम्यंद्रष्टव्यंहे।तदस्तुग्रहावैइतिप्रतिज्ञांविधायपूजयेत्।तत्रादौग्रहध्यानमस्यपुरा
णे।पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः।सप्ताश्वरथसंयुक्तोद्विभुजःस्यात्सदारविः॥१॥श्वेतःश्वेतांबरधरोदशाश्वःश्वे
तवाहनः।गदापाणिर्द्विबाहुश्चकर्तव्योवरदःशशी॥२॥रक्तमाल्यांबरधरःशक्तिशूलगदाधरः।चतुर्भुजोमेषगमोवर
दस्याद्भुतासुतः॥३॥पीतमाल्यांबरधरःकार्णिकारसमद्युतिः।खड्गचर्मगदापाणिःसंस्थितोवरदोबुधः॥४॥देवदैत्यगुरू
तद्वत्पीतश्वेतौचतुर्भुजौ।दंडिनोवरदौकार्यौसाक्षसूत्रकमंडलू॥५॥६॥इंद्रनीलद्युतिःशूरवरदोगृध्रवाहनः।बाणबा
णासनधरःकर्तव्योर्कसुतःसदा॥७॥कराकवदनःखड्गचर्मशक्तीवरप्रदः।नीलसिंहासनस्थश्चराहुरत्रप्रशस्यते
॥८॥धूम्राद्विबाहवःसर्वेगदिनोविकृताननाः।गृध्रासनगतानित्यंकेतवस्तुवरप्रदाः॥९॥सर्वेकरोटिनःकार्या
ग्रहालोकहितावहाः।अंगुलेनोद्धृतंनिंबसमिधांधारुविनिर्मितां॥ ॥ततःषोडशोपचारपूजा॥सहस्रशीर्षेतिषोडश
र्चस्यसूक्तस्य।नारायणऋषिः।पुरुषोदेवता।अनुष्टुप्छंदः।अंत्यात्रिष्टुप्।षोडशोपचारपूजायांविनियोगः॥ ८।
तत्रादौन्यासः।सहस्रशीर्षेतिवामकरंन्यसेत्।पुरुषएवेतिदक्षिणे।एतावानस्येतिवामपादे।त्रिपादूर्ध्वइतिद

क्षिणे॥ तस्मा द्विराळि तियाम जानौ। यत्पुरुषेणे तिदक्षिणे। तंय न्ता मिति वाम कक्षौ। तस्मा द्यज्ञा दिति दक्षिणे। तस्मा द्य ज्ञा त्सर्वहुत ऋचः इति नाभौ। तस्मा दश्वा इति हृदये। यत्पुरुष मिति कंठे। ब्राह्मणो स्येति वाम बाहौ। चंद्रमा मनसः इति दक्षिणे। नाभ्या इत्यास्ये। सप्तास्या सन्निति नेत्रयोः। यज्ञेन यज्ञ मिति मूर्ध्नि॥ ॥अथ पंचांग न्यासः। ब्राह्मणो स्येति हृदये। चंद्रमा मनसः इति शिरसि। नाभ्याऽआसी दिति कवचे। सप्तास्या सन्निति नेत्रयोः। यज्ञेन यज्ञ मित्यस्त्राय फट्॥ ॥सहस्रशीर्षेत्यावाहनं। पुरुषऽएवेति आसनं। एतावा नस्येति पाद्यं। त्रिपादूर्ध्वऽइत्यर्घ्यं। तस्मा द्विराळ्। चमनीयं। ततः पंचामृत स्नानं। आप्यायस्वेति गौतमः सोमो गायत्री। क्षीरस्नाने विनियोगः। ओमाप्यायस्व॰ चंदनादि पंचोपचारान् दत्त्वा ओम्भूर्भुवः स्वरिति पूजामपसार्य॥ दधिक्राव्णो वामदेवो दधिक्राव्णो नुष्टुप्। दधिस्नाने वि॰ ओं दधिक्राव्णोऽ॰ पंचोपचारादि। एतं मिमिक्षेरत्समदो घृतस्नुष्टुप्। घृतस्नाने॰ ओं घृतं मिमिक्षे॰ पंचोपचारादि। मधुवाताऽऋतायते गौतमो मधुर्गायत्री। मधुस्नाने॰ ओं मधुवाताऽऋ॰ पंचोपचारादि। स्वादुः पवस्वेति नो भार्गवः शर्करा जगती। शर्करास्नाने॰ ओं स्वादुः पवस्व॰ पंचोपचारादि। यत्पुरुषेणेति सर्वेण पुरुषसूक्तेन अर्घ्यं गामिश्च शुद्धोदकस्नानं। ततः आचमनं दत्त्वा। तंयज्ञमिति वस्त्रं। यज्ञोपवीतमिति वस्त्रमंत्रेण यज्ञोपवीतं। तस्मा द्यज्ञा दृचः सामानि जज्ञिरे। छंदांसि जज्ञिरे तस्मा त्तस्मा द्यजुस्तस्मा दजायत। गंधद्वारामिति च। अक्षन्नाभ्वा। तस्मा दश्वाअयेजातेति पुष्पं। यत्पुरुषमिति धूपं। ब्राह्मणो स्येति दीपं। श्रियेजातश्च। चंद्रमा मनसः स्वादुः पवस्वेति नैवेद्यं। आचमनं दत्त्वा। नाभ्याऽआसीत्याः फलिनीति फलं। सप्तास्या सन्निति तांबूलं। यज्ञेन यज्ञमिति हिरण्यरूपो हिरण्यगर्भ गर्भस्थमिति दक्षिणां। नानामंत्रैः पुष्पांजलिं दत्त्वा। प्रदक्षिणान मस्कारं स्तुतिं च कुर्यात्। आवाहनादि षोडशोपचार पूजा संपूर्णी स्तून्यूनातिरिक्तं विधिवदस्तु। यस्य स्मरणेति प्रार्थयेत्॥ यथा॥ आदित्याय नमः इदमासनमित्या द्यावाहनक्रमेण प्रणवादि नमो नैः नाममंत्रैः स्तत्तद्देवतैर्वा प्रत्येकं पूजयेत्। एतावत्यशक्तौ वादित्याद्यावाहित देवताभ्यो नमः इति मंत्रेण सर्वान् पूजयेत्॥ ॥ततो गृहवेदीशान भागेऽव्रणमकालकं बहिर्दग्धसंतप्तभूषितं चंदनमाला चर्चितं कलशं निदध्यात्। तच्चैवं। मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति यवान् क्षिप्त्वा आ कलशेषिति कलशं स्थाप्य इमं मेगंग इति जलेन पूरयित्वा गंधद्वारामिति गंधं क्षिपेत्। याओषधीरिति सर्वौषधीः। ओषधयः समिति यवान्। काण्डात्काण्डादिति दूर्वा। अश्वत्थेवऽइति पंचपल्लवान्। स्योना पृथिवीति पंचमृदः। याः फलिनीरिति फलं। सहिरत्नानीति पंचरत्नानि। हिरण्यरूपऽइति हिरण्यं। युवासुवासाऽइति वस्त्रेण रक्षसूत्रेण च वेष्टयेत्। पूर्णा दर्वीति धान्यपूर्णमुपरि पात्रं न्यसेत्। तदुपरि तत्त्वा यामीति वरुणमावाह्य पूजयेत्। ततः कलशे गंगां द्यावाहयेत्। सर्वेसमु॰ यजमानस्य दुरितक्षयकारकाः। तन्नः कलशा

भिमंत्रणं। कलशस्य मुखे० ततः कलशप्रार्थना। देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं। त्वन्नो येसर्वतीर्थानि देवाः सर्वे त्वयिस्थिताः। त्वयितिष्ठंतिभूतानि त्वयिप्राणाः प्रतिष्ठिताः। शिवस्त्वयंत्वमेवासि विष्णुस्त्वं च प्रजापतिः आदित्या वसवोरुद्रा विश्वेदेवाः सपैतृकाः। त्वयितिष्ठंतिसर्वेपियतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहेजलोद्भव। संनिध्यंकुरुदेवेश प्रसन्नोभवसर्वदा। ततोरुद्रपीठलिंगतोभद्रं विरचयेत्। तद्यथा॥ चतुर्विंशतिरेखाः रेखाः प्राग्दक्षिणायताः। कोणेषुश्रृंखलाः पंचपदावल्यस्तुपार्श्वतः॥१॥ पदैर्नवभिरालेख्या चतुर्भिर्लिपुश्रृंखलाः। लघुवल्यः पदैः षड्भिस्तोष्टदशभिः पदैः॥२॥ कृत्वालिंगानिवाप्यस्तत्रयोदशभिरंतरा॥ ततो वीथिद्वयेनैवपीठंकुर्याद्विचक्षणः॥३॥ तस्यपदाः पंचपदाद्वाराण्यपितथैव च। एकादशीतिपदमध्येपद्मंस्वस्तिकमिष्यते॥ कोणेषुश्रृंखलाः कार्याः पदैस्त्रिभिरतःपरं॥ पदैश्चतुर्भिर्दिक्षुस्युर्भद्राण्येषांसमंततः॥ एकादशपदावल्यो मध्येपद्मलतालिखेत्। पद्मेनवपदंछित्वा लिंगतोभद्रमिष्यते। श्रृंखलाःरक्तवर्णेनवल्लीनीलेनपूरयेत्। रक्तेनश्रृंखलालब्ध्वीवल्लीपीतेनपूरयेत्। लिंगानिरक्तवर्णानिश्वेतेनाथपद्मवापिकाः। पीठंसपादंश्वेतेनपीतेनद्वारपूरणं। मध्येस्थःश्रृंखलारक्तावल्लीनीलेनपूरयेत्। भद्राणिपीतवर्णानिपीतापंकजकर्णिकाः। दलानिश्वेतवर्णानियद्वाचित्राणि कारयेत्। तिस्रोरेखाबहिः कार्यासितरक्तासिताः क्रमात्। इति। अत्राधिष्ठाउक्तमंडलदेवतास्थापयेत्। ततुपरिपट्टादौरुद्रयंत्रंरचयेत्। तद्यथा। प्रणम्यजगतामीशंउमादेहार्धधारिणं। यंत्रोद्धारमिमंवक्ष्येरुद्रकल्पानुसारतः॥१॥ मध्येवृत्तंसमालेख्यंतन्मध्येवदशाक्षरं। बहिरष्टदलंपद्मंततः षोडशपत्रकं॥२॥ चतुर्विंशतिपत्राढ्यंद्वात्रिंशत्पत्रकंतथा॥३॥ चत्वारिंशत्पत्रकंतुरुद्रनेत्रसूर्यसमप्रभं। पंचपद्मात्मकंवृत्तं चतुरस्रंचतुर्द्वारं। सत्वंरजस्तमश्चेतित्रिगुणैः परितोवृतं॥४॥ चतुर्द्वारंद्वारदेशेबहिर्नागैसमावृतं। रुद्रपीठमितिख्यातं देवतास्तत्रविन्यसेत्॥५॥ चत्वारिंशद्दलंचैकं देवतानामुदाहृतं। कर्णिकामध्यदेशेतुरुद्रंपद्मास्यमालिखेत्॥६॥ नमो भगवतेरुद्रायेतितारादिकेन्यसेत्। सोयंदशाक्षरोमंत्रःसर्वकामार्थसिद्धिदः॥७॥ प्रणवादिनमोंतानिपंचास्यानितःपरं॥ सद्योजातंवामदेवमघोरंतदनंतरं॥८॥ ततस्तत्पुरुषंप्रोक्तंईशानंपंचमंक्रमात्। प्रधानमिदमाख्यातंप्रथमावरणेततः॥९॥ दलेष्वष्टसुनंद्यादीन्यूर्वादिक्रमतोन्यसेत्॥ दूर्ज्यदूर्जकयोर्मध्येप्राचीस्याद्यत्रलेखने॥१०॥ आदौनंदीमहाकालोगणेशश्चभृंगिरीटिस्कंदोमाचंडसंज्ञकाः॥११॥ षोडशारेततः पद्मेद्वितीयावरणेयजेत्। अनंतरंतथास्त्रंशिवंचैकपदंतथा॥१२॥ एकरुद्रंत्रिमूर्तिंचश्रीकंठंवामदेवकं। ज्येष्ठंश्रेष्ठंतथारुद्रं कालंकालविकरणं॥१३॥ बलंबलविकरणं बलप्रमथनंतथा। तृतीयावरणेपद्मेचतुर्विंशद्दलेतथा॥१४॥ अणिमामहिमाचैवलघिमागरिमातथा। प्राप्तिःप्राकाम्यमीशित्वंवशित्वंचाष्टसिद्धयः॥१५॥ ततः

ओंकारः

पदक्रमेणैवन्यसेद्ब्राह्म्यादिदेवताः। ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा॥वाराहीचैन्द्रीचचामुंडाचंडिकाचेतिताः
क्रमात्ततोष्टचसितांगादीन्भैरवान्विन्यसेत्पुनः॥१७॥असितांगोरुरुश्चंडःक्रोधउन्मत्तभैरवः॥कालसंहारभैरवाश्चाष्टकीर्तिताः॥१८॥द्वात्रिंशत्यत्रकेपूर्वंमवाष्टकमुदाहृतं॥भवःसर्वस्तथेशानःपशूनांपतिरेवच॥१९॥
रुद्रश्चोग्रोभीमनामामहाश्चेतिक्रमादिमैः॥ततोनंतोवासुकिश्चतक्षकश्चकुलीरकः॥२०॥कर्कोटकःशंखपालःकं
बलोश्वतरस्तथा॥ततोष्टसुन्यसेद्वैन्यंपद्महेयमनुंनमः॥२१॥राकुंतलेयंभरतंनलंरामंमितिक्रमात्॥ततःकुलाच
लानष्टौदलेष्वष्टसुविन्यसेत्॥२२॥हिमवान्निषधोविंध्योमाल्यवान्पारियात्रकः॥मलयोहेमकूटश्चगंधमादनसंज्ञ
कः॥२३॥चत्वार्यावरणान्येवंपंचमावरणेततः॥चत्वारिंशद्दलेपद्मेपंचमावरणेन्यसेत्॥२४॥इंद्राद्यष्टौलोकपाला
नष्टसुक्रमतोन्यसेत्॥इंद्रमग्निंयमंचैवंनिर्ऋतिंवरुणंतथा॥२५॥वायुंकुबेरमीशानंदलेष्वष्टसुविन्येसेत्॥इंद्रादि २७
लोकपालानामष्टौशक्तीस्ततोन्यसेत्॥२६॥शचीस्वाहाचवाराहीरवर्जिनीवारुणीतथा॥मृगारूढाचकौबेरीश्लक्ष्मिनी
चतथाष्टमी॥२७॥ततोष्टनामसुधानींवज्रादीन्यष्टसुन्यसेत्॥वज्रंशक्तिंदंडखड्गंपाशंकुशगदाअपि॥२८॥त्रिशू
लंलोकपालानामायुधानिक्रमादिमे॥ततोष्टावाहनान्येषामष्टसुक्रमशोलिखेत्॥२९॥ऐरावतंतथामेषंमहिषंप्रे

तसंज्ञकं॥मकरंवस्रगंचैवनरंचवृषभंतथा॥३०॥ऐरावतादयोप्यष्टदिग्गजास्तदनंतरं॥ऐरावतःपुंडरीकोवामनःकुमुदोंजनः॥३१॥
पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः॥स्मरहंतःपुनर्लेख्याःपंचपप्रांतकाविहिः॥३२॥इंद्रंविन्यस्यपूर्वस्यामग्नेयामग्नि
मेवच॥दक्षिणस्थांयमंचैवनैर्ऋत्यांनिर्ऋतिंतथा॥३३॥प्रतीच्यांवरुणंवायुंवाय व्यांविन्यसेत्ततः॥कुबेरंचैवकौबेर्यांईशान्या
मीशमालिखेत्॥३४॥विरूपाक्षंचविन्यस्येद्ब्रह्मणेयामग्नियोगतः॥निर्ऋत्यांनिर्ऋतेर्योगेविश्वरूपंचविन्यसेत्॥३५॥वाय व्यां
वायुयोगेचलिखेत्यशुपतिंतथा॥ईशान्यामूर्ध्वलिंगंचलिखेदीशानयोगतः॥३६॥प्रागादिक्रमतोलेख्याःशेषाधाभूरुहाहिः॥
विप्रवर्णश्वेतरूपंसहस्रफणिमंडितं॥३७॥शेषंविन्यस्यपूर्वस्यांपूजयेदुपचारकैः॥तक्षकंवैश्यवर्णंचनीलरूपंशतेःफणैः॥
३८पुक्कमुनंगुकायंचआग्नेयांदिशिविन्यसेत्॥अनंतंविप्रवर्णंचतथाकुंकुमवर्णकं॥३९॥सहस्रफणसंयुक्तंदक्षिणस्थांप्र
पूजयेत्॥वासुकिंक्षत्रियंपीतवर्णंसप्तशतैःफणैः ४० पुक्कमावाह्यवारुण्यांपूजयेद्धूपदीपकैः॥महापद्मंवैश्यवर्णंपुक्कंपंचशतैः
फणैः४१पुक्कमुनंगुकायंचवायव्यांदिशिविन्यसेत्॥कंबलंश्वतवर्णंचरक्षंत्रिंशत्फणैर्युतं॥४२॥कौबेर्यांदिशिविन्यस्यपूजयेद्ध
विधानतः॥कर्कोटकंक्षत्रियवर्णंश्वेतंत्रिंशत्फणैर्युतं ४३ ईशान्यांदिशिविन्यस्यपूजयेद्धूपदीपवत्ततः॥रुद्रपीठमिदंसर्वंरुद्रकल्पे
पुविश्रुतं४४शंभुनास्वेयमाख्यातंभक्तानुग्रहकाम्यया॥कुंकुमागुरुकर्पूरैर्भूर्जपत्रेषुवापटे४५लिखितंपूजितेभक्त्यास

+ पुक्कमुकुंगुकायंचनैर्ऋत्यांदिशिविन्यसेत्॥शंखपालंक्षत्रियंचपीतंसप्तशतैःफणैः॥४

र्वमोक्षार्थसिद्धिदं।यंत्रमंत्रमिदंप्रोक्तंआख्यातादेवतेतिच॥४५॥पूजनीयंप्रयत्नेननेनेदंदेवतामयं।नाग्नि-चोरभयंतत्र
न-चराजभयंक्वचित्।यंत्रेदंलिखितंतत्रपूज्यतेविधितःसदा॥४६॥इतिश्रीस्कंदपुराणेस्कंदमहेश्वरसंवादेरुद्रयंत्रसमा
प्तं॥ ॥तद्यथा।कर्णिकायां।ॐनमोभगवतेरुद्रायेतिदशाक्षरः।ततःप्रथमकोष्ठेषुप्राग्दिक्क्रमेणमध्येच।ॐसद्योजा
तायनमः।१।वामदेवायअघोरायतत्पुरुषायनमःईशानाय।५।ततःप्राग्दिक्क्रमेण।नंदी१महाकालः२गणेश्वरः३
वृषभः४भृंगिरिटी५स्कंदः६उमा७चंडीश्वरः८इतिप्रथमावरणं।अनंतः१सूक्ष्मः२शिवः३एकपात्४एकरुद्रः५त्रिमूर्तिः २१
६श्रीकंठः७वामदेवः८ज्येष्ठः९श्रेष्ठः१०रुद्रः११कालः१२कलविकरणः१३बलः१४बलविकरणः१५बलप्रमथनः१६
इतिद्वितीयावरणं॥अणिमा१महिमा२लघिमा३गरिमा४प्राप्तिः५प्राकाम्यं६ईशिता७।वशिता८सर्वेश्वरी
९कौमारी१०वैष्णवी११वाराही१२इंद्री१३चामुंडा१४चंडिका१५असितांगभैरवः१६रुरुभैरवः१७चंडभै०१८क्रोधभै
२०उन्मत्तभै०२१कालभै०२२संहारभै०२३भीषणोभैरवः२४इतितृतीयावरणं॥भवःशर्वःईशानः।पशुपतिःरुद्रः।
उग्रःभीमः।महान्।अनंतः।वासुकिः।तक्षकः।कुलीरकःकर्कोटकः।शंखपालः।कंबलः।अश्वतरः।धृतराष्ट्रः।बलाहकः।
अजुनः।शंखकुलेयः।भरतः।नलः।रामः।हिमवान्।निषधः।विंध्यः।माल्यवान्।पारियात्रः।मलयः।हेमकूट।गंधमाद

नः॥३२॥इतिचतुर्थावरणं॥इंद्रः।अग्निः।यमः।निर्ऋतिः।वरुणः।वायुः।कुबेरः।ईशानः।शची।स्वाहा।वाराही।रवड्रिनी।वारु
णी।वायवी।कौबेरी।ईशानी।वज्रं।शक्तिः।दंडः।खड्गः।पाशः।अंकुशः।गदा।त्रिशूलः।ऐरावतः।मेषः।महिषः।प्रेतः।महिषः।प्रे
तः।मकरः।हरिणः।नरः।वृषभः।ऐरावतः।पुंडरीकः।वामनः।कुमुदः।अंजनः।पुष्पदंतः।सार्वभौमः।सुप्रतीकः॥४७॥इतिपंच
मावरणं॥एवंपंचपद्मानिकृत्वाबहिश्चतुष्कोणंस्मरेत्।तत्रपूर्वेइंद्रः।अग्निः।विरूपाक्षश्चास्तये।दक्षिणेयमः।निर्ऋतिः।वरु विरूपाक्षश्च
णः।वायव्यंवायुः।पशुपतिश्चोत्तरेकुबेरः।ईशानः।ऊर्ध्वांतेगंच।इतिप्रतिदिशं॥ततोभरद्वाहुहिः।पूर्वेविप्रवर्णंश्वेतंसह निर्ऋतये ✓
स्रफणंशेषंपूजयेत्।आग्नेयांवैश्यवर्णंनीलंपंचशतफणाप्रक्षिप्तंतक्षकं।दक्षिणेकुंकुमाभंक्षत्रियवर्णंसहस्रफणंअनं
तं।नैर्ऋत्यांक्षत्रियवर्णंपीतंसप्तशतफणासंयुतंवासुकिं।पश्चिमेक्षत्रियवर्णंपीतंसप्तशतफणासंयुतंशंखपालं।
वायव्यांवैश्यवर्णंनीलंपंचशतफणासंयुतंमहापद्मं।उत्तरेशूद्रवर्णंरक्तंत्रिंशत्फणसंयुतंकंबलं।ईशान्यांशूद्रवर्णं
श्वेतंत्रिंशत्फणसंयुतंककोटकं।प्रणवादिनमोंतैर्नमोभिः।एतादेवताःआवाह्यपूज्याः।स्कंदानुसारेणरुद्रपीठंदेव
ताइति॥ततोरुद्रपीठादीशानदिग्भागेपूर्ववत्कलशंनिधायरुद्रजपार्थंतेनबालेनंदुग्धात्।ततआचार्योग्निस
मीपमागत्याग्नेःपश्चिमतउपविश्यहेतिस्रोवासमिधआदायाधानंकुर्यात्।ततआस्मिन्रुद्रोमेदेवतापरिग्र

हार्थमित्यादि-वक्ष्यमाणाज्येनेत्यंतमुक्त्वा सग्रहपक्षेग्रहानमुकसंख्याकाभिरर्कादिसमिद्भिश्चरुपक्षेमुक
संख्याचवक्ष्यमाणाभिः स्रुतस्यजपस्यदर्शांशेनासुकद्रव्येण-चेत्युक्त्वा अधिदेवताघंगत्वपक्षेधिदेवताघमु
कद्रव्येणामुकसंख्यमुक्त्वारुद्रमुकहोमपक्षेणामुकमंत्रविभागपक्षेणामुकद्रव्येणेत्युक्त्वारुद्रपीठदेवताए
केकयाज्याहुत्योक्त्वाशेषेणस्विष्टकृतमित्यादियक्ष्यमाणंतमुक्त्वाव्याहृतिभिः समिधोसमिधोवजुहुयात्। द्व्याणी
हृतिसंख्यामंत्रविभागश्चवक्ष्यते। ततः परिस्मुह्यपरिस्तरणंकुर्यात्। तच्चद्वितीयमेरवलायांपश्चिमे-चपूर्ववत्
योनिरंभेकार्थंशारवांतरीयाणांपरिधिनिधानमप्यत्रैव॥ ततःपर्युक्षणादिप्रणीतापूरणांतंकृत्वाआचार्योब्रह्म
णंपूर्ववत्तमेवासनेदक्षिणतउपवेशयेत्। पूर्वंयजमानेनवृत्तस्यब्रह्मणःपुनर्वरणमित्येकेचित्करांतेततः प्रणीताप्र २२
णयनेकृतेग्रहाणांचरुपक्षेतद्धोनिर्वापणादि-चरुश्रपणकर्मणेत्याज्यसंस्कारेचरुणानित्यादिद्रव्येणाचसहा
ज्यं पर्यग्नि कृत्वाआज्यासादनाद्याज्यभागांतंकुर्यात्। आज्यभागांतेगणपतयेप्रथमकुतिरुक्षारातिसारेहेमा
द्रौदेवीपुराणे। गणाधिपतयेदेयाप्रथमानुवराकुतिः। अन्यथाविफलंविघ्नवतीहनरौसंयशति। ततोयजमानो
नेदक्षिणतोब्रह्मणःपश्चिमतउपविश्यसावधानःउद्देशत्यागंकुर्यात्। तत्रत्वयमेवचेज्ञोमंकरोतिनदाप्रया

कां ५

नोत्सृजति ३

कृतिस्थायेदंनममेत्यादितत्तद्देवताभ्यस्त्यागंकुर्यात्। यदात्वृत्विजः प्रतिनिधयोवाहोमंकुर्युस्तदायजमानःआ
ज्यहोमानंतरंयक्ष्यमाणाःसर्वादेवताउद्दिश्यहोष्यमाणानिचसर्वाणिद्रव्याणिनिर्दिश्यइताभ्योदेवताभ्यइदमिदं
नमअग्नयेस्वाहेत्यत्सृजेत्॥ श्रद्धावत्कर्तृकत्वात्। बह्वृग्विगादिकर्तृकेहोमेप्रत्याकृतित्यागस्यकर्तुमशक्यत्वात्त्यागपूर्व
त्वाच्चहोमस्यासर्वहोमानंतरंत्यागस्यायुक्तत्वादिदानीमेवत्यागः कार्यइतिशेषः॥ ततआचार्यादयः सावधानाः यजमा
नाग्निरसिद्धिंप्रार्थयंतोहोमंकुर्युः। तत्रग्रहपक्षेग्रहाणांसमिधः। अर्कःपलाशःखदिरअपामार्गोथपिप्पलःउदुंबरःशमी
दूर्वाकुशाश्चसमिधः क्रमादिति। तत्संख्याचाष्टोनशतमष्टाविंशतिरष्टौवैकैकस्य। समिधश्चमधुसर्पिर्दधिरूपात्रिमध्य
क्तोःकार्याः। दधिस्थानेदुग्धंवाचरुस्थानेतंडुलाःकरणपक्षेपिप्रत्येकमेवाष्टाविंशत्यष्टोनशताकृतिपक्षाः। तत्रैका
कृतिपक्षेस्रुचावदानधर्मेणचार्येजुहुयात्। अथवाकृतिपक्षेतुसुष्ठिनिर्वापानंतरंअनुनिर्वापेचरुवाकृतिमथवा
र्यादयः सर्वेहस्तेनैवजुहुयुः। स्विष्टंत्रब्राह्मणपक्षेसरुवेजुहुयात्। अधिदेवताघंगत्वपक्षेत्रयोविंशतिदेवतानांसमि
च्चरुतिलादीनांसमानसंख्ययाजुहुयात्। तासामपिसमिधःपालाश्यादयः। निर्वापेचेताभ्योपिनिर्वापः। अधिदेवता
दीनांचसमिच्चरुहोमसंख्याग्रहसंख्यातोन्यूनाकार्येतिशेषः। सर्वंकाकृतिपक्षस्तत्रापिसाधारणः। एषांसमिधः

+ततः ऋत्विजः स्रुतस्यग्रहजपस्यदशांशेनतिलैर्यवैर्मिश्रितैर्वाजुहुयुः॥३

प्रह्रिमन

कनिष्ठपक्षेप्रत्येकंचतस्रइतिशिष्टाः। समिच्चरुसंख्यासमानैवचैषांतिलादिद्रव्याकृतिसंख्यावोढव्या। इंद्राग्नेष्टागतेपि
अधिदेवतादिवक्तेभ्योहोमेपिकार्यः। ग्रहादीनांमंत्रास्तच्छंदोदेवताश्चाग्रहपीठपूजायामुक्ताअत्राकृतिप्रमाणं। तत्रसर्वाः
समिधःप्रादेशमात्राः। कुल्येनतिसृष्काद्राः। तत्रदूर्वाणांतिसृणामेकैकाकृतिः। कुशस्यतुत्र्यादिकृपत्रेवाअर्कादिपलं
भेतुपालाशस्यप्रतिनिधयाः। चरोस्त्वेकाकृतिपक्षेअंगुष्ठपर्ववदानधर्मरूपमवदानं। अन्यपक्षेषुग्रासमात्रत्वं।
तिलानांतुप्रस्तिमात्रंद्वादशपर्वपूरिकाचेति। प्रमाणेउक्तमे। अष्टसहस्रमष्टशतंवेतिमध्यमे-चतुराशीतिश्चतुःप
ष्टिर्वा। कनिष्ठेअत्राकृतिसंख्या। तत्रनवग्रहसमिधांनवशतंद्वादशसप्ततिश्च। यद्वाद्विशतीद्विपंचाशच्चअथवाद्वि
सप्ततिरेव। तेषामेवचरूपक्षेएकाकृतिपक्षेणचअन्यपक्षत्रयेसमित्समानैवसंख्यातिलादीनांजपदशांशस्तु
सहस्राणिनवनवशतानिनवतिर्वेति। अधिदेवतादिपक्षेतत्समिधांषट्शतानि-चतुश्चत्वारिंशच्च। एकंशतंच
तुराशीतिश्चवाद्विनवतिर्वा-चरूपक्षेतस्यषट्शती-चतुश्चत्वारिंशच्च। शतं-चतुराशीतिश्चवात्रयोविंशतिर्वातिला
देस्तुविकल्पेनसमिच्चरुसमैवसंख्येति। इंद्रादिपक्षेतत्समिधांद्विशतं-चतुर्विंशति-चतुःषष्टिर्वाद्वात्रिंशद्वा। चरु
पक्षेतस्यद्विशति-चतुर्विंशति-चतुःषष्टिर्वा। अष्टौवातिलादेस्तुसमिच्चरुसंख्यैव। तंत्रपक्षेसर्वासंख्याएकीकृ

त्यमहासंख्याबोढव्या। अत्रकनिष्ठपक्षाश्रयणेपिसांगतैव। मध्यमोत्तमपक्षाश्रयणेतु फलेनतारतम्यंद्रष्टव्यं। ए
वंग्रहहोमंविधायततः प्राग्उक्तन्यासपूर्वकं प्रागुक्तार्षेयादिस्मरणपूर्वकंचश्रीरुद्रंध्यायन्स्वयंजुहुयात्। अशक्तावे
वंविधाः प्रतिनिधयोजुहुयुः। पुत्राद्यर्थमहारुद्रेवैवरत्विजोजुहुयुः। तत्रद्रव्याणि। रुद्रतिलायवमिश्रिताउभेव्रीहयः।
आज्यंवेति। पुत्रार्थमहारुद्रेत्वाज्यपरिप्लुतादूर्वाः। अयंहोमःप्रधानभूतेहोमरुद्रेजपरुद्रांगहोमेचरूपादिपंचस्वपि
होमेषु। अथजपरुद्रस्यांगभूतहोमस्त्रेधा। समग्रहोमोदशांशहोमः शतांशहोमश्चेति। होमरुद्रेतुपंचस्वपिसमग्रहो
मएव। तत्रैतेषुत्रिषुपिपक्षेषुषड्भिःप्रकारैर्मंत्रविभागः। एकधात्रेधाषोढाषोडशधाअष्टचत्वारिंशद्धाएकोनस
प्तत्युत्तरशतधाचेति। अयंनमकविभागएव। चमकेतुरुनत्यक्षप्रदर्शनायैवविशेषः। स्पष्टीभविष्यति। तत्रैनत्यक्षप्र
दर्शनएवनमकचमकसंख्याप्युच्यते। तत्रैकधाविभागस्तावद्रूपोसमस्तनमकाध्यायेनैकाकृतिः। चमकेषण्णावि
धूइस्वाएकामाकृतिंकृत्वावाजश्चमइतिसमस्ताध्यायेनापराकृतिरिति। यद्वाअग्नाविष्णूरुद्रैकादशचमकानुवाकै
रेकादशेतितनश्चरूपेसमग्रहोमेएकधापक्षेतिस्रस्त्रयोदशवाआकृतयोभवंति। त्रेधाविभागेपिरूपेआद्यैश्चतुर्भि
रनुवाकैरेकाकृतिरपरैश्चतुर्भिर्द्वितीयाशेषैस्त्रिभिस्तृतीयेति। यद्वानमस्तरत्यतःसभापतिभ्यश्चवोनमस्त्य

तेनैका।नमोअस्येभ्यस्त्यारभ्यनमःपार्यायचावार्यायचेत्यंतेनापरा।नमःप्रतरणायचेत्यारभ्यसमाप्तिपर्यंतेनतृतीयेति।चमकेपक्षद्वयंप्राग्वत्।ततःरूपेसमग्रहोमेत्रेधाविभागपक्षेपंचपंचदशवाकुत्यैःतेषोडाविभागेपिरूपेत्रेधाविभागवत्आद्यविभागाभ्यामाकृतिद्वयंतृतीयविभागेयएतावंतस्तएतेनतृतीयाकृतिः।नमोरुद्रेभ्योयेपृथिव्यामित्यादौचनमोरुद्रेभ्योयेपृथिव्यांयेषामन्नमितिनमोरुद्रेभ्योयेपृथिव्यांयेनरिष्टेयेषांवानइतिनमोरुद्रेभ्योयेपृथिव्यांदिवियेषांवर्षमितिच।इषवस्त्यादिवाक्यशेषसहितैस्त्रिभिर्यजुर्भिराकृतित्रयमिति।चमकेषुपूर्ववत्पक्षद्वयं।ततश्चरूपेसमग्रहोमेषोडाविभागपक्षेअष्टावष्टादशवाकृतयः।षोडशधाविभागेपिरूपेनमस्तक्षभ्यस्त्यारभ्यनमस्तक्षभ्यस्त्यंतेप्रथमाकृतिः।रथकारेभ्यश्चवोनमस्त्यंतोनमःस्वायुधायचेत्यंतेनद्वितीया।सुधन्वनेचेत्यंतःसहस्राणिसहस्रधेत्येतदृगंतेनतृतीया।सहस्राणिसहस्रशस्त्यंतःतेषांसहस्रयोजनस्त्यर्धंचैप्रत्येकसंबंधेनदशमंत्रैर्दशाकृतयः।नमोरुद्रेभ्यस्त्रिंशच्चप्राग्वत्त्रिभिर्यजुर्भिस्त्रिस्त्रिंशत्-चमकेपक्षद्वयमुक्तं।ततश्चरूपेसमग्रहोमेएकोनसप्तत्यंतरशतधापक्षेएकसप्तत्यंतरशतमेकाशीत्यधिकशतंवारूपेदशांशशतांशहोमोनभवति।एवंवक्ष्यमाणदशांशशतांशहोमेऽप्येकरूपेदशांशशतांशहोमोनेतिके

२४ न४

एकादशानुवाकैःप्राग्वद्दशभिर्दशनमोरुद्रेभ्यस्त्रिंशत्पूर्ववत्त्रिभिर्यजुर्भिस्त्रिस्त्रिंशत्-चमकेपक्षद्वयंतदेव।ततश्चरूपेसमग्रहोमेपंचाशत्षष्टिर्वाकृतयः।एकोनसप्तत्यंतरशतधाविभागेपिरूपेतत्रप्रथमानुवाकेपंचदशाकृतयः।द्वितीयतृतीयचतुर्थानुवाकेषूभयतोनमस्कारैःसप्तचत्वारिंशद्भिर्यजुर्भिःसप्तचत्वारिंशत्।पंचमषष्ठसप्तमाष्टमनवमानुवाकेषुपुरस्तान्नमस्कारेद्व्यशीतिभिर्यजुर्भिर्द्व्यशीतिः।एवंक्वचियजुष्वुभयतोनमस्कारंकेचिदिच्छंति।तत्र्यंबकायचरुद्रायचनमइतिपठित्वातमेवनमःशब्दंपुनरावृत्यनमःशर्वायचपशुपतयेचनमइतिपठेदित्यादिनेयं।तत्रपक्षद्वयेपिनमोवःकिरिकेभ्यइत्यादिमंत्रचतुष्टयेदेवानांहृदयेभ्यइतिप्रत्येकमावर्त्तनीयं।अयंचनमोवःकिरिकेभ्यस्त्यत्रसहस्राणिसहस्रशस्त्यत्रनमोरुद्रेभ्योयेपृथिव्यामित्यत्रचयोजुषंगउक्तःसयदाएतैर्मंत्रैःप्रत्येकहोमस्तदेवृषदानुनैभिःप्रत्येकंहोमस्तदाजपेएकधाहोमादावभिषेकेपारायणयथाध्यैनमेवपाठः।ततोदशमानुवाकेद्वादशभिर्द्वादशाकृतयः।एकादशानुवाकेप्राग्वद्दशभिर्मंत्रैर्दशनमोरुद्रेभ्यस्त्रिंशत्त्रिभिर्यजुर्भिस्त्रिस्त्रिंशत्-चमकेपक्षद्वयमुक्तं।ततश्चरूपेसमग्रहोमेएकोनसप्तत्यंतरशतधापक्षेएकसप्तत्यंतरशतमेकाशीत्यधिकशतंवारूपेदशांशशतांशहोमोनभवति।एवंवक्ष्यमाणदशांशशतांशहोमेऽप्येकरूपेदशांशशतांशहोमोनेतिके

पंचदशभिः

५४

चित्। सर्वत्ररूपेआद्यविभागत्रयेदशांशाद्यसंभवेपिउत्तरविभागत्रयेदशांशादिप्राप्तिरस्तित्यन्योअयमेवचशि
ष्टेराहृतःपक्षः।तत्ररूपेदशांशहोमेषोडशाधाविभागपक्षेआकृतिद्वयंदशांशाः।अर्थादिकेअत्यांतरत्वेसमस्ताकृति न २
ग्रहणात्।तत्राद्याभ्यांमंत्राभ्यांआद्येनांशेनचमंत्रेणेतियाज्ञिकाः।तत्रैवाष्टाचत्वारिंशत्यक्षेपंचाकृतयोदशांशाः।तृ
तीयेरूपंचभिर्यद्वाद्याभ्यांद्वाभ्यांअंशैस्त्रिभिरितिपक्षद्वयं।तत्रैवएकोनसप्तत्यन्तरशतधाविभागेसप्तदशाकृतयो
दशांशाः।तत्राद्याषोडशसप्तदशाआद्यानवअष्टाबंत्याकृतिपक्षद्वयं।रूपेएवषष्ठेपक्षेशतांशआकृतिद्वयं।प्राग्वन्म
त्राभ्यांतेयंपञ्चसमग्रेरूपेणहोमस्तत्रैवचमकाकृतिर्नान्यत्रतेनैतेतुत्रिष्वपिपक्षेषुनचमकाकृतिः।रुद्राणुसमग्र २५
होमेएकधाविभागेएकादशानमकाकृतयः।चमकेतुअग्नाविरुद्रत्येकयैकादशभिरनुवाकैरेकादशीतिर्द्वादश
सर्वास्त्रयोविंशतिराकृतयः।तत्रैवत्रेधाविभागेनमकानांत्रयस्त्रिंशच्चमकानांप्राग्वद्द्वादशीतिसर्वाः पंचचत्वारि
शत्।तत्रैवद्वाविभागेनमकानांषडधिकाषष्टिश्चमकाकृतिः सप्तशतसप्ततिः।तत्रैवद्वेऽष्टाधाविभागेनम
कानांषट्सप्तत्यन्तरंचमकाकृतिभिः सहाष्टाशीत्यधिकंशतं।तत्रैवाष्टाचत्वारिंशत्यक्षेनमकानामष्टाविंशत्य
धिकापंचशती।चमकैः सहचत्वारिंशदधिका।तत्रैवएकोनसप्तत्यन्तरशतधाविभागेनमकानामष्टादशश

शतं २

५ नमकप्रतिरूपकयोजितेरेकैकरूपानेएवै
केति

शतानिएकोनषष्टिश्चमकैः सहैकासप्ततिरिति। रुद्रांदशांशहोमेरूपेसमग्रहोमेएकधाविभागादिषट्पक्षेषुयांसं
ख्योक्तासैवाबोद्व्या।तत्रषोडशाधाविभागादिपक्षेअवशिष्टरूपस्यदशांशारूपद्विःपंचसप्तदशसहिताक्रमे
णप्राग्वदेवसंख्याबोद्व्या।तथाचविंशतिस्त्रिंशद्रूपंचपंचाशत्पंचषष्टिर्वाएकोननवतिर्नवनवतिर्वेति।
रुद्रांशतांशहोमःषोडशाधाविभागादिपक्षत्रयएवसंभाव्यते।तत्रनमकेप्राग्वदाकृतिद्वयं।चमकेत्वेकंपक्षद्व
यमिति।चतस्रःदशावाषोडशाधाविभागेआकृतयः।अष्टाचत्वारिंशत्यविभागेतुप्राग्वत्पंचचमकेद्वौपक्षाविति
सप्तसप्तदशावाकृतयोभवंति।एकोनसप्तत्यन्तरविभागेतुसप्तसप्तदशचमकेचपक्षद्वयमितिविंशतिस्त्रिंश
दिति।एवंरुद्रेसमग्रहोमेएकधाविभागेएकविंशत्यन्तरशतंनमकानांतावत्यआकृतयः।चमकानांद्वात्रिंशदुत्त
रशतत्रयंतत्रिपंचाशदधिकंशतद्वयमाकृतयः।तत्रैवत्रेधाविभागेनमकानांत्रिषष्ट्यधिकंशतत्रयंचमकानामनं
तरोक्तैवेति।चतुःशतानिपंचनवतिश्च।तत्रैवषोडशविभागपक्षेनमकानांसप्तशतानिषट्त्रिंशच्च।चमकानां
तावत्यएवेतिसर्वाअष्टशतानिअष्टपंचाशच्च।तत्रैवद्वाधाविभागपक्षेनमकानांसहस्रमेकंनवशतानि
षट्त्रिंशच्च।चमकानांतावत्यएवेतिसर्वाःसहस्रद्वयंअष्टषष्टिश्च।तत्रैवाष्टाचत्वारिंशत्यक्षेनमकानांपंचसहस्रा

अनुर्दशावा २

रुद्र० णिअष्टौशतान्यष्टौच। चमकानामुक्तैवेतिसर्वाः पंचसहस्राणिनवशतानि-चत्वारिंशच्च। तत्रैवएकोनसप्तत्यु
त्तरशतधापक्षेनमकानांविंशतिसहस्राणि-चत्वारिंशतानिएकोनपंचाशच्च। चमकानांताएवेतिसर्वाः विंश
तिसहस्राणिपंचशतान्येकाशीतिश्च। लघुरुद्रएवदशांशहोमेएकधापक्षेद्वादशरूपकाणिदशांशइतिनमका
नांद्वादशाहुतयः। चमकानांचरूपकेउक्तक्रमेणद्वादशेतिसर्वाश्चतुर्विंशतिः। तत्रैवत्रेधाविभागेनमकानांषट्त्रिंश
त्शमकाइतिभिः सहाष्टाचत्वारिंशत्। तत्रैवषोढाविभागेनमकानांएकशताष्टनवतिः। अवशिष्टरूपस्यप्राग्वद्दश
मकैः सहद्वेशतेषट्चा। तत्रैवाष्टाचत्वारिंशत्यधिकेनमकानांपंचशतानिषट्सप्ततिः। अवशिष्टरूपस्यप्राग्वत्य
चमकैः सहपंचशतानित्रिनवतिश्च। तत्रैवैकोनसप्तत्युत्तरशतधापक्षेनमकानांद्वेसहस्रेषोडशविंशतिः। अव
शिष्टरूपेप्राग्वत्सप्तदशाहुतयइति। लघुरुद्रएवदशांशहोमेएकधापक्षेनमकाध्यायेनैका। चमकैः सहत्रि
सप्तयोदशावाहुतयः। अत्रास्मिन्नेवपक्षेअवशिष्टरूपाणांशतांशहोमाभावः। तत्रैवत्रेधापक्षेरूपकस्यनिस्रावः
शिष्टैकविंशतिरूपकाणामेका-चमकैः सहषड्विंशावा। तत्रैवषोढाविभागरूपस्यषड्अन्याचैकाचमकैः सहनवै
कोनविंशतिर्वा। तत्रैवषोडशधापक्षेरूपस्यषोडशअन्यास्तिस्रश्चमकैः सहैकोनत्रिंशतिरेकत्रिंशद्वा। तत्रैवाष्टा

चमकैः सहद्वेसहस्रेसप्तपंचाशदाहुतयइति। ४

चत्वारिंशत्यधापक्षेरूपस्याष्टाचत्वारिंशत्। अन्यादश। चमकैः सहषष्टिः सप्ततिर्वा। तत्रैवैकोनसप्तत्युत्तरशतधापक्षे
रूपस्यतावत्यः। अन्याः पंचत्रिंशत्। चमकैः सहषट्पंचाशदधिकेवाशतद्वयमिति। अवशिष्टरूपेरूपकमंत्रवि
भागः प्राग्वत्। महारुद्रेसमग्रहोमेएकधाविभागेनमकानांसप्तसहस्रमेकत्रीणिशतानिएकत्रिंशच्चाहुतयः। चम
सहस्रं४ कानांचतुःशतीद्विपंचाशच्चेतिसर्वाः सप्तसहस्राणिसप्तशतानित्र्यशीतिश्च। तत्रैवत्रेधाविभागेनमकानांत्रीणिसहस्रा
णिनवशतानिनवतिश्च। चमकैः सहपंचसहस्राणित्रीणिशतानिचतुर्विंशतिश्च। तत्रैवषोढाविभागेनमकानां
सप्तसहस्राणिनवशतानिषडशीतिश्च। चमकैः सहनवसहस्राणिचत्वारिंशतानिअष्टत्रिंशच्च। तत्रैवषोडशधा
विभागेनमकानामेकविंशतिसहस्राणिद्वेशतेषण्णवत्याहुतयः। चमकैः सहद्वाविंशतिसहस्राणिसप्तशतान्यष्टा
चत्वारिंशच्च। तत्रैवाष्टाचत्वारिंशत्धाविभागेनमकानांत्रिषष्टिः सहस्राण्यष्टौशतान्यष्टाशीतिश्च। चमकैः सहप
ञ्चषष्टिः सहस्राणित्रीणिशतानिचत्वारिंशच्च। तत्रैकोनसप्तत्युत्तरशतधाविभागपक्षेनमकानांद्वेलक्षेचतुर्विंश
तिसहस्राणिनवशतानिएकोनचत्वारिंशच्च। चमकैः सहद्वेलक्षेषड्विंशतिसहस्राणित्रीणिशतान्येकनवतिश्च।
महारुद्रेदशांशहोमेएकधाविभागेनमकानामेकशतंत्रयस्त्रिंशच्च। रूपकाणीतितावत्यआहुतयः। चमकानांद्वा

दशरूपीच्छत्वारिंशत्तमरूपयोर्जेद्वादशवेति। सर्वाः देशातेएकोनाशीतिरेकोननवतिर्वा। तत्रैवत्रेधाविभागेनमकानांत्रीणिशतानिनवनवतिश्च। चमकैःसहपंचशतानिपंचचत्वारिंशत्पंचपंचाशद्वा। तत्रैवषोढाविभागेनमकानांसप्तशतानिनवतिश्च चमकैःसहनवशतानिचतुश्चत्वारिंशच्चतुःपंचाशद्वा। एषुत्रिष्वपिपक्षेषवशिष्टरूपाणांदशांशोनास्ति। तत्रैवषोडशधाविभागेनमकानांद्वेसहस्रेएकशतमष्टाविंशतिश्च। अवशिष्टरूपस्यद्वे। चमकैः सहद्वेसहस्रेदेशातेषट्सप्ततिः षडशीतिर्वा। तत्रैवाष्टाचत्वारिंशद्धाविभागेनमकानांषट्सहस्राणित्रीणिशतानिच तुराशीतिश्च। अवशिष्टरूपेपंच। चमकैःसहषट्सहस्राणिपंचशतानिपंचत्रिंशत्पंचचत्वारिंशद्वा। तत्रैवैकोनसप्तत्युत्तरशतधाविभागेनमकानांद्वाविंशतिसहस्राणिचत्वारिंशतानिसप्तसप्ततिश्च। अवशिष्टरूपेसप्तदशचम कैःसहद्वाविंशतिसहस्राणिषट्शतानिचत्वारिंशत्पंचाशद्वेति। सहदेशातांशहीनमेकधाविभागेचयोदशरूपा णिशतांशद्वितावत्येवाऊनत्रयः। चमकानांत्वेकादशिन्यांशादशरूपद्वयेचमकानांप्रत्येकंद्वादशवेति चतस्रश्चत्वारिंशतिर्वा। सर्वेएकोनत्रिंशदेकोनपंचाशद्वा। अत्रास्मिन्नेवपक्षेवशिष्टरूपाणांशतांशोना स्ति। तत्रैवत्रेधाविभागेनमकानांमेकोनचत्वारिंशदवशिष्टैकत्रिंशद्रूपाणांचैकाचमकैःसहषट्पंचाशत्ष

ट्सप्ततिर्वा। तत्रैवषोढाविभागेनमकानांअष्टसप्ततिः। अवशिष्टरूपाणांद्वेचमकैःसहषण्णवतिः। षोडशा धिकंशतंवा। तत्रैवषोडशधाविभागेदेशातेअष्टचत्वारिंशदवशिष्टरूपाणांपंचाचमकैःसहदेशातेएकोनत्रिंशदेकोन पंचाशद्वा। तत्रैवाष्टाचत्वारिंशद्धाविभागेनमकानांषट्शतानिचतुर्विंशतिश्च। अवशिष्टरूपाणांपंचदशचमकैः सहषट्शतानिपंचपंचाशत्पंचसप्ततिर्वा। तत्रैकोनसप्तत्युत्तरशतधाविभागेनमकानांद्वेसहस्रेएकंशत सप्तनवतिश्च। अवशिष्टरूपाणांद्विपंचाशच्चमकैःसहद्वेसहस्रेदेशातेपंचषष्टिपंचाशीतिर्वेति। अतिरूक्षसमग्रहो मेएकधापक्षेचतुर्दशसहस्राणिषट्शतानिएकचत्वारिंशच्चरूपाणीतितावत्येवाऊनत्रयः। चमकानांतुप्रत्ये कंद्वादशेतिपंचदशसहस्राणिनवशतानिद्वासप्ततिश्च। सर्वेत्रिंशत्सहस्राणिषट्शतानित्रयोदशवाऊ नत्रयः। तत्रैवत्रेधापक्षेरूपाणांत्रिचत्वारिंशत्सहस्राणिनवशतानित्रयोविंशतिश्चमकैःसहैकोनषष्टिसहस्राणि अष्टशतानिपंचनवतिश्च। तत्रैवषोढापक्षेरूपकाणामष्टाशीतिसहस्राण्यष्टशतानिषट्चत्वारिंशच्च। चमकैःसहलक्षमेकंत्रीण्यष्टशतानिअष्टादशच। तत्रैवषोडशधापक्षेरूपाणांद्वेलक्षेचतुस्त्रिंशत्सहस्रा णिद्वेशतेषट्पंचाशच्चचमकैःसहद्वेलक्षेपंचाशत्सहस्राणिद्वेशतेअष्टाविंशतिश्च। तत्रैवाष्टाचत्वारिं

शान्यक्षेरूपाणांसप्तलक्षाणिद्वेसहस्रेसप्तशतान्यष्टषष्टिश्चमकैःसहसप्तलक्षाणिअष्टादशसहस्राणिसप्त
शतानिचत्वारिंशच्चेतत्त्रैवैकोनसप्तत्यन्तरशतधापक्षेचतुर्विंशतिर्लक्षाणिचतुःसप्ततिःसहस्राणित्रीणिश
तान्येकोनत्रिंशच्चचमकैःसहचतुर्विंशतिर्लक्षाणिनवतिसहस्राणित्रीणिशतान्येकाचेति।अतिरूद्रदर्शांश
होमेएकधापक्षेनमकानामेकंसहस्रंचत्वारिंशतानिचतुःषष्टिश्चाहुतयः।चमकवाकानांघ्रतिरूपयोजने
एकंसहस्रंपंचशतानिषष्टवतिः।अवशिष्टरूपेद्वेद्वादशवतिसर्वास्त्रीणिसहस्राणिद्विषष्टिद्वासप्ततिर्वा।त
त्रैवत्रेधापक्षेनमकानांचत्वारिंसहस्राणित्रीणिशतानिद्वानवतिश्चमकैःसहपंचसहस्राणिनवशतानि
नवतिःशतवाःतत्रैवषोढापक्षेनमकानामष्टौसहस्राणिसप्तशतानिचतुराशीतिश्चचमकैःसहद्वासहस्राणित्रीणि
शतानिद्व्यशीतिद्वानवतिर्वा।एषुत्रिष्वपिपक्षेषुसत्कावशिष्टरूपदशांशाभावः।तत्रैवषोडशधापक्षेनमकानांत्रयो
विंशतिसहस्राणिचत्वारिंशतानिचतुर्विंशतिश्चमत्कावशिष्टरूपस्यद्वेशतेपंचविंशतिसहस्राणिचतुर्विंशतिश्च
तुस्त्रिंशद्वातत्रैवाष्टाचत्वारिंशन्यक्षेनमकानांसप्ततिसहस्राणिद्वेशतेद्वासप्ततिश्चमत्कावशिष्टरूपस्यपंचचच
मकैःसहएकसप्ततिसहस्राणिअष्टौशतानिपंचसप्ततिःपंचाशीतिर्वा।तत्रैवैकोनसप्तत्यन्तरशतधापक्षेनम

DR BHAU DAJI MEMORIAL

कानांद्वेलक्षेसप्तचत्वारिंशत्सहस्राणिचत्वारिंशतानिषोडशचमत्कावशिष्टरूपस्यचसप्तदशचमकैःसहद्वेलक्षेएकोन
पंचाशत्सहस्राणिएकत्रिंशदेकचत्वारिंशद्धुतिःअतिरूद्रेशतोरुद्रहोमेएकधाविभागेनमकानामेकंशतंषट्चत्वारिंशच्चे
तिनेषांतावत्यआहुतयः।अवशिष्टैकचत्वारिंशद्रूपाणांशतांशोनाप्तिःसंभवति।चमकानांत्रयोदशरुद्रीष्वेकंशतंपंचाश
च्चेतिरूपकत्रयेद्वेद्वादशवतिःषट्त्रिंशद्धुतिःसर्वास्त्रीणिशतान्यष्टादशत्रिंशद्धुतयःतत्रैवत्रेधाविभागेनमकानांचत्वारिं
शच्छतानिअष्टत्रिंशच्चअवशिष्टरूपाणामेकंएकत्रिंशद्धुतयःतत्रैवषोढाविभागेनमकानामष्टौशतानिषट्सप्ततिश्च।
अवशिष्टरूपाणांद्वेचमकैःसहएकसहस्रंचत्वारिंशत्सप्ततिर्वा।तत्रैवषोडशधाविभागेनमकानांद्वेसहस्रेत्रीणिशतानि
षट्त्रिंशच्चअवशिष्टरूपाणांसप्तचमकैःसहद्वेसहस्रेपंचशतानिपंचपंचत्रिंशद्धुतयः।तत्रैवाष्टाचत्वारिंशत्धाविभागेनम
कानांसप्तसहस्राण्यष्टौचअवशिष्टरूपाणांविंशतिश्चमकैःसहसप्तसहस्राणिएकंशतंनवतिश्चशतद्वयंविंशतिर्वा।
तत्रैवैकोनसप्तत्यन्तरशतधाविभागेपक्षेनमकानांचतुर्विंशतिसहस्राणिनवशतानिपंचपंचत्रिंशद्धुतिः।एवंकैश्चिदुक्त
संख्याभिहिता।अन्यैस्तुयत्रप्राणेनसंख्यातोधिकंरूपकमवशिष्यतेतत्रसमग्ररूपकेनहोमः।यत्राःत्वाहुतयोवशिष्यंतेत
त्रषडाहुतिपर्यंतंआद्योक्तिभिर्मंत्रैस्तिस्रआहुतयः।अंत्योक्तिभिस्तिस्रइतिएवंचकिंचिदधिकमात्रतोमेसंपद्यतेननुप्रा

चमकैःसहषट्चत्वारिंशच्छतानिएका

गुक्लपक्षवत्प्रधानभूतकिंयद्दोमलोपोभवतीत्युक्तं।अस्मिंश्चपक्षेप्रागुक्तसंख्ययैषासंख्याएकीकृत्ययोज्या।इहचरुद्रहो
मेउक्तेषुप्रकारेषुयत्राकृतिसंख्याधिक्यमाकृतिपरिमाणाधिक्यंवातत्रतत्रफलतारतम्यंद्रष्टव्यं॥ ॥एवंरुद्रहोमंवि
धायप्रागुक्तहृदयादिषडङ्गन्यासंकुर्यात्।ऋत्विगादिपक्षेतुसर्वंप्येवमेवकुर्युः।ततःआचार्यःआचाराद्यज्ञभा
गावाप्रागुक्तरुद्रपीठदेवताभ्यस्तत्तन्नामभिर्मन्त्रैराज्यस्रुवेणजुहुयात्। इहचहौष्यद्द्रव्यमधोमेरवत्कायोष्मौचपतितंतद्
ग्नौनानिक्षिपेत्।मध्यमोपरिमेरवत्कयोःपतितस्यपरिधिपरिस्तरणांतर्गतत्वेनाग्नितप्तेपार्श्वत्वात्।तद्बहिर्गतस्यातःप्रक्षे
पनिषधाद्धोनिहोमप्रकारसंक्षेपः॥ ॥एवंहोमंपरिसमाप्य-चंदनाद्यक्षपत्रारेरक्तैश्चन्दनैर्मूर्तिमंत्रेणसंकल्पपूर्वंकंस्वाहास्व २९
धायुतमग्निंपूजयेत्।अग्नयेगंधादिकंबहिरेवदद्यात्।ततोग्रहपीठदेवतानांरुद्रपीठदेवतानांचोत्तरपूजांकेचिदाहुः।पूजासंपूर्णतां
वाचयित्वा।यस्यस्मृत्येति०।आवाहनंनजानामीत्युक्त्वाक्षिप्तरुद्रयाश्वेत्यादिनवाहुतीर्हुत्वाबलिदानंचकुर्यात्॥ नचैवं॥ अग्न्याय
तनस्यसमंतादिक्षुविदिक्षुचमाषभक्तबलिंसदीपंदिक्पालेभ्योदद्यात्॥त्रातारमिंद्रंगर्ग इंद्रक्षिप्तपूरुद्रीत्यर्थंबलिदानेविनियोगः।
ॐत्रातारमिंद्र० इंद्रायसांगायसपरिवाराय सायुधायसशक्तिकायएषमाषभक्तबलिर्नमः।सोइंद्रादिरक्षबलिंसप्तम
मयजमानस्यवासकुटुंबस्यायुःकर्त्तास्वेमकर्त्ताशांतिकर्त्तापुष्टिकर्त्तावरदोमेवोत्तिष्ठ्यास्तज्जलानिपूर्ववन्मुरवस्यजेत्॥

अग्निंकाण्वोमेधातिथिरग्निर्गायत्री।अग्निस्त्री।त्यर्चं०ॐअग्निंदूतं०अग्नयइत्यादि॥ततोदक्षिणेयमायसोमंयमोयमेनुष्टुप्।
यमस्त्री।ॐयमाय०यमायसांगाय०ततोनैर्ऋत्येमेधुणोघोरःकण्वोनिर्ऋतिर्गायत्री।निर्ऋतिस्त्री।ॐमेधु०निर्ऋतयेसांगाय०ततः
पश्चिमेतत्त्वायामिसुनःशेपोवरुणस्त्रिष्टुप्।वरुणस्त्री।ॐतत्वाया०वरुणायसांगाय०ततोवायव्येवायोशतंगौतमोवामदेवोवा
युरनुष्टुप्।वायुस्त्री।ॐवायोशते०वायवेसांगाय०ततउत्तरेसोमोधेनुंगौतमःसोमस्त्रिष्टुप्।सोमस्त्री।ॐसोमोधेनुं०सोमायसां०
ततईशान्येतमीशानंगौतमईशानोजगती।ईशानस्त्री।ॐतमीशानं०ईशानायसां०ततऊर्ध्वयोर्मध्येआयंगौःसार्परा
अनंतोगायत्री।अनंतस्त्री।ॐआयंगौः०अनंतायसां०केचिच्चुस्योनामेधातिथिरनंतोगायत्री।स्योनापृथिवीत्यनेनानंतबलि
दानमाहुः।ततःपश्चिमनैर्ऋत्यमध्येब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्।ब्रह्मस्त्री।ॐब्रह्मजज्ञानं०ब्रह्मणेसां०ततोग्र
इवेदःसमंतात्परुद्रबलयोदेयाः।तत्रादौआरोचनहिरण्यरूपःसवितात्रिष्टुप्।सूर्यस्त्री।ॐआरोचन०सूर्यायेश्वराग्न्यधिदे
वताप्रत्यधिदेवतासहितायेमंमाषभक्तबलिंसमर्पयामिनमः।इतिपुष्पाक्षतांल्लिपेत्।रक्षोघ्नंबलिंगृहाणममयजमानस्यवा
शांतिकर्त्तेत्यादिष्वमुत्तरत्रापि।ततोवैश्वानरायेआप्यायस्वगौतमः सोमोगायत्री।सोमस्त्री।आप्यायस्व०सोमायोमाब्रूपाधि
देवताप्रत्यधिदेवतासहितायेमं० ततोदक्षिणेअग्निर्मूर्धाविरूपोंगारकोगायत्री।अंगारकस्त्री।ॐअग्निर्मूर्धा०भौमायस्कं

रुद्रप० अग्निरूपाधिदेवताप्रत्यधिदेवतास० ततईशान्यामुदुध्यंबुधःसौम्योबुधस्त्रिष्टुप्बुधस्त्री०ॐउद्बुध्यस्वं० बुधायसां० नारा
यणविष्णुरूपाधिदेवताप्रत्यधिदेवतास० ततउत्तरेबृहस्पतेतपरंस्मदोबृहस्पतिस्त्रिष्टुप्बृहस्पतिस्त्री०ॐबृहस्पते० बृहस्पतये
सां०ब्रह्मैवरूपाधिदेवताप्रत्यधिदेवतास० ततःपूर्वेशुक्रःपाराशरःशुक्रोद्विपदाविराट्शुक्रस्त्री०ॐशुक्रः शु०शुक्रायसां०शक्रेंद्रा
णीरूपाधिदेवताप्रत्यधि० ततःपश्चिमेशमग्निरिशंविष्ठःशनैश्चरउष्णिक्शनिस्त्री०ॐशम्० शनैश्चरायसां०यमप्रजापतिरू
पाधिदे० ततोनैर्ऋत्येकयानोवामदेवोराहुर्गायत्रीराहुस्त्री०ॐ कयानश्चित्रं वेसां० कालसर्परूपाधिदेव० ततोवायव्येकेतुंमधुछ
दाःकेतुर्गायत्रीकेतुस्त्री०ॐकेतुंकृ० केतवेसां० चित्रगुप्तब्रह्मरूपाधिदे० अथवेघ्नरेगणपत्यादिपंचकस्यगणानांत्वाशौनको
गृत्समदोगणपतिर्जगतीगणपतिस्त्री०ॐगणानांत्वा० गणपतयेसां० ऋद्धिबुद्धिसहिता०जातवेदसेकश्यपोदुर्गात्रिष्टुप्दुर्गास्त्री०
ॐजातवेदसे० दुर्गायैसां० नवोनोव्यश्वांगिरसोवायुर्गायत्रीवायुस्त्री०ॐनवोवायो० वायवेसां०आदित्यसभाकाशोगायत्रीआ
काशायेत्यादिरेषोउषाप्रस्कण्वोग्निर्नोगायत्र्यग्निस्थांसांगाभ्यां० वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्वास्तोष्पतयेसां०
ततोरुद्रपंचम्यांतेयेकद्रुदायघोरःकण्वोरुद्रोगायत्रीरुद्रस्त्री०ॐकद्रुदाय० रुद्रायोमासहितायसांगाय० ततोमहाबलिं
दद्यात्कुंकुमादिरक्तपुष्पादियुक्तंसदीपंसदक्षिणांक्षेत्रपालायदद्यात्क्षेत्रस्यपतिनावामदेवःक्षेत्रपालोनुष्टुप्

क्षेत्रपालस्त्री०ॐक्षेत्रस्यपतिना० क्षेत्रपालाय० प्रेतपिशाचराक्षसशाकिनीडाकिनीवेताळादिपरिवारयुतायेमंसदीपं
सतांबूलंसदक्षिणांकंमाषमक्तबलिंसमर्पयामि।सोभोक्षेत्रपालइमंबलिंगृहाणममयजमानस्यवाआयुः कर्त्तेत्यादि।इमं
बलिंभूमेणुन्नासणेनवाचतुष्पथेक्षेपयेत्।ततःप्रक्षालितपाणिपादआचम्यदेशकालौस्मृत्वाऽतस्यामुकहोमस्यपूर्णता
सिध्यर्थंपूर्णाहुतिंहोष्यइतिसंकल्प्यस्रुचिद्वादशगृहीतंघृतंहोत्वावस्त्रनारिकेलादिफलचंदनमालायुतेनदुपरिनिधायपूर्ण
हुतियजमानान्वारब्धआचार्योजुहुयात्।तत्रमंत्राः।समुद्रादूर्मिरितितत्यस्यगोतमोवामदेवोग्निस्त्रिष्टुप्।पूर्णाहुतिहोमेवि०ॐ
समुद्रादूर्मिर्म०मूर्धानंदिवोबार्हस्पत्योभरद्वाजोवैश्वानरस्त्रिष्टुप्।पूर्णाहु०ॐमूर्धानंदिवो०पुनस्त्वादित्याग्निर्वसुरुष्णिक्
शक्वरीसुरुष्णिक्।पूर्णाहुति०ॐपुनस्त्वादि०पूर्णादर्विन्देवाःशतक्रतुरनुष्टुप्।पूर्णाहुति०ॐपूर्णादर्वि०सप्ततेअग्नेसप्तवान
ग्निर्जगती।पूर्णा०ॐसप्ततेअ०धामंतेगोतमोवामदेवआपोजगतीपूर्णाहु०ॐधामंतेवि०स्वाहाकारेणाग्नौप्रक्षिपेत्।पू
र्णाहुतिमुन्नमोंजुहोतीतिपठेयुः।यजमानस्तूदमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्रतवेअग्नयेअद्भ्यश्चनमम
इत्यंकुर्यात्।ततोवसोर्धारा।तत्रायंप्रकारः।वृक्षरूपरिस्तंभहृयविधृतामोदवरीमूर्ध्वीमकोटरांबाहुप्रमाणांयजमा
नमात्रींवाआर्द्रस्रुवंपूर्वाग्नांनिधायतदुपरिश्रेरुवत्यादिधृतेननिर्मलएतदूरितेनताम्रमृदादिकुंभेनाधोयवमाच्छि

जगती

देणाज्यंसंचतास्रुक्प्रणालिकयानिर्गच्छद्ग्रेसुवर्णनिष्कंधोनिपततीसंततधारामग्नौपातयेत्तत्रयतंत्यंच
मकाग्नेयादीनिसूक्तानिश्रावयेत्। चमकानुवाकानामत्रिः काण्ऋषिः। आ धाग्ना वैष्णवीगायत्रीशिष्टंयजुः। वाजादयो
भादिविश्वेषांदेवताः। वसोर्धारायांविनियोगः। ॐअग्नाविष्णू॰ तत्रकूष्मवाश्वमहत्यंमंत्रोद्वादशावारमावर्त्तनीयः। अ
ग्निमीळइतिनवानांवैश्वामित्रोमधुछंदाग्निर्गायत्री। वसोर्धारायां॰ ॐअग्निमीळे॰ विष्णोनुकमितिषष्ठ्यौचथ्योदीर्घ
तमाविष्णुस्त्रिष्टुप्। वसोर्धारायां॰ ॐविष्णोनुकं आतेपितरितिपंचदशानांगरुत्समदोरुद्रस्त्रिष्टुप्। वसोर्धारायां॰ ॐआते
पित॰ स्वादिष्ठयेतिदशानांमधुछंदाः पवमानसोमोगायत्री। वसोर्धारायां॰ ॐस्वादिष्ठया॰ महावैश्वानरसौममहावै
श्वानरारण्येआरण्येषष्ठप्रपाठकेसामद्वयंतस्यवैश्वानरऋषिः। वैश्वानरोदेवता। पथ्याबृहतीछंदः। वसोर्धारा॰॥
ज्येष्ठसामंतुमूर्धानंदिवइत्यस्यात्रिर्गीतंतस्यमरुद्वाजऋषिः। वैश्वानरोदेवतात्रिष्टुप्छंदः। वसोर्धा॰ सामसामवेदो
क्तप्रकारंपठेत्। तत्रोपलक्षणंतेनान्यदप्याग्नेयादियथाभ्यासंपठेत्। परंत्वेकैकमेवोपादेयगतेकवचनस्यविवक्षित
त्वात्। ततोवसोर्धारांजुहोतीस्तुवाकमपिपठंति। एवंवसोर्धारांविधाययथाशास्त्रंपूर्णपात्रविमोकादिकर्मशेषंसमा

पयेदाचार्यः॥ तदनंतरंवरऋत्विजोप्रतिनिधायश्रुदक्छिरवाः प्राङ्मुखंयजमानस्यहस्तेश्रेवः संपादनं
वीतितच्चैवं। शिवाआपःसंतिनियजमानंस्तेजलंक्षिपेत्। सोमनस्यमस्तिपुष्पंअस्तंनारिष्टंचास्तित्यस्तनाः
दीर्घमायुःश्रेयःशांतिपुष्टिस्तुष्टिस्तुभ्यंपुनर्जलंनिक्षिपेत्। मयाभवन्नियोगेनमहारुद्रादिमध्येयथाशक्तिनदत्तोज
पः तदशांद्रादिपसेणयःकृतोहोमस्तस्मात्तोमाज्जपाच्चयदूनंश्रेयस्तनुभ्यमहंसंप्रददे। इदंनिर्वर्तयत्वाधजमान
प्रतारणमात्रमेव। तदनंतरमग्नेःपश्चिमभागेप्राङ्मुखोपविष्टोयजमानउदङ्मुखआचार्यादीन्पूजयेत्। ततोवरऋत्विग्भ्यो
दक्षिणांदद्यात्। अद्येत्यादितत्तत्कर्मणोमांगतासिद्ध्यर्थंआचार्यादीन्पूजयिष्ये। इतिसंकल्प्यश्रीरुद्रस्व
रूपिणेआचार्यायरुद्रपाद्यंरुद्रार्घ्यंवासोयुगलंगंधपुष्पधूपदीपतांबूलानिदत्वापूर्वोक्तएवंगुणेतिकालेदेशेचरु
तत्तत्कर्मणःप्रतिष्ठाफलसिध्यर्थंअमुकगोत्रायामुकवेदांतर्गतायमुकशाखाध्यायिनेअमुकशर्मणेआचार्यायय
थाशक्तिहिरण्यमग्नेदेवसवितुर्ददेइतिकुशास्तरसहितंजलंविप्रहस्ते
निक्षिप्यनममेतिवदेत्। द्विजस्तुस्वस्तिरस्त्विति। कामस्तुतिंकरदंकस्माअदादित्यादिकांस्वशाखास्थांपठेत्। एवंब्रह्मपूजांविधायदक्षि

क्षिणांदत्वाअनंतरंग्रहजापकेभ्यःपूजापूर्वकंदक्षिणांदद्यात्।प्रतिनिधिस्कंपरितोषकंदद्यात्।यथाशक्त्याचार्यादिभ्यो
लंकारमुद्रिकोदपात्रोपानद्युजनछत्रचामरादीन्यपकरणानिदद्यात्।गोरभावेतत्प्रतिनिधित्वेननिष्क्रयेणतदर्धंत
दर्धंवासुवर्णंशक्त्यादद्यात्।ततोद्वारजापकेभ्योपिदक्षिणांदद्यात्।ततोनानावेदांतर्गतनानाशाखाध्यायिभ्योनानागो
त्रेभ्योनानाशर्मस्थेभ्योब्राह्मणेभ्योदीनानाथेभ्यश्चेयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजेनमममोत्सृकृशास्तत्तल्लंघि
त्वाॐतत्सदितिवदेत्।तदनंतरंग्रहवेदीसमीपस्थकलशोदकेनरुद्रकलशोदकेनाचाराद्वारकलशोदकेनदूर्वापंचप
ल्लवैरुद्धुरवाऽआचार्यऋत्विजश्चातिक्रांतः।प्राङ्मुखंस्वकुटुंबंउपविष्टंयजमानमभिषिंचेयुः।अभिषेकेचस्त्रीवामभागेअ
भिषेकसमयेगीतवाद्यादिमंगलघोषःकार्यः।समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रिष्टुप्।अभिषेकेविनियोगः।ॐसमुद्रज्ये॰
ष्ठाइत्यादिअस्त्रीभ्यामित्यादिअन्येदिक्चस्थानेत्वोक्तामंत्रैकैकाद्याः।पौराणिकाःसुरासत्वामभिषिंचंतुब्रह्मवि
ष्णुमहेश्वराःवासुदेवोजगन्नाथस्तथासंकर्षणोविभुःप्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते।आखंडलोग्निर्भगवान्यमोवैनिर्ऋति
स्तथावरुणःपवनश्चैवधनाध्यक्षस्तथाशिवःब्रह्मणासहिताःसर्वेदिक्पालाःपांतुतेसदा।कीर्तिर्लक्ष्मिर्धृतिर्मेधापुष्टिश्रद्धा

क्रियामतिःबुद्धिर्लज्जावपुःशांतिःकांतिस्तुष्टिश्चमातरः।एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः।आदित्यश्चंद्रमाभौमोबुध
जीवसितार्कजाः।ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः।देवदानवगंधर्वायक्षराक्षसपन्नगाः।ऋषयोमनवोगावोदेवमा
तरश्चदेवपत्न्योदुमानागादैत्याश्चाप्सरसांगणाःअस्त्राणिसर्वशस्त्राणिराजानोवाहनानिचौषधानिचरत्नानिकालस्या
वयवाश्चयेसरितःसागराःशैलास्तीर्थानिजलदानदाः।एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये।ततएवमभिषेकानंतरंस
वैषधीरत्नमिश्रेणशुद्धोदकेनस्नात्वाशुक्लमाल्यांबरधरःसपत्नीकोयजमानोग्रहपीठदेवतानांरुद्रपीठदेवतानांचगंधा
द्युपचारैरुत्तरपूजांदक्षिणाप्रदानप्रदक्षिणानमस्कारांतांनिर्वर्त्यपुष्पांजलिंदत्वाआवाहनंनजा॰अपराधसह॰यस्य
स्मृत्याच॰मंत्रहीनं॰इतिपीठहृदयंसमाप्य।उत्तिष्ठब्रह्मणस्पतेअभ्यारोहेदं॰यातुदेवगणाइतिपुष्पांजलिंदत्वा।आवाहनंनजा॰अपराधसह॰यस्य
देवताविसर्ज्यएवमेवरुद्रपीठदेवताविसर्जयेत्।ग्रहपीठंरुद्रपीठंचसोपस्करंरुद्रप्रतिमांचाचार्यायदद्यात्।प्रतिमादान
मंत्रः।श्रीरुद्रप्रतिमांस्वर्णमयींवस्त्रयुगान्वितां।श्रीरुद्रप्रीतयेचापिप्राप्तानिष्टनिवृत्तये।प्रार्थितार्थसिध्यै।चतुर्भ्यःश्रीरु
द्रेभ्यःसंप्रदेयंविधानेनयथोक्तफलमस्तुमे।इति।यदातुमारकतंलिंगंतदादानमंत्रः।इदंमारकतंलिंगंरुद्रायरौप्यपी

ठसमन्वितं नवरत्नराजतेनापि श्वेतवस्त्रयुगान्वितं ॥ धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वि
तं ॥ संग्रदधीविधानेनयथोक्तफलमस्तके ॥ काश्मीरलिंगेतु । इदमारकमित्यत्र काश्मीरमितिप्रयोज्यं । द्वादशधान्या
नितु ॥ व्रीहियवमाषतिलमुद्गरवल्वगोधूममसुरप्रियंगुअणुश्यामाकनीवाराः । तेषामानंतु प्रस्थाधिकं द्रोणावधिय
थाशक्तिग्राह्यं ॥ उक्तधान्याभावेयथासंभवंग्राह्याणि । ततोग्निंप्रपूज्यगछगछसुरश्रेष्ठस्थस्थानेपरमेश्वरायत्रब्रह्मा
दयोदेवास्तत्रेछतुताशनइत्यग्निंविसृज्यसर्वमंडपदेवताद्वारदेवताश्चयांतुदेवगणाःसर्वइतिविसृज्यध्वजपताका
छत्रकलशोपस्कारयुतंकुंभमंडलंप्रदेनमइतिमंत्रेणस्थंडिलेनिधायास्मिन्इतिब्रूयात् । अथसंदर्भस्यबहुरास्तोषयेत् । ततःकृतस्यमहारुद्रादिक ३३
र्मणःसंपूर्णतासिध्यर्थंयथोपपन्नेनान्नेनयथाकालेनानागोत्रानानाशर्मणःअमुकसंख्याकान्ब्राह्मणान्भोजयिष्य
इतिसंकल्प्ययथाकालंभोजयेत् । भूरिदक्षिणांसंकल्प्यानंतरंब्राह्मणभोजनसंकल्पः । रूपे १ रुद्रा ३ त्रपुराद्ये ११
महा ५ रुद्रे १२१ अतिरुद्रएतदेवैकादशगुणंचयोदशरात्रान्येकत्रिंशद्वेति ॥ ततोब्रह्मार्पणंब्रह्मेति-चतुर्भिश्चचतु-
र्मयायत्कृतंयथाकालंयथादेशंयथास्नानंयथाशक्तिचमहारुद्रादिकर्मतेनमहारुद्रःश्रीपरमेश्वरःप्रीयतां ।

ॐतत्सद्ब्रह्मार्पणमस्तिकुशजलंक्षिपेत् । ततःसदस्यांश्चंदनाक्षतपुष्पवस्त्रतांबूलदक्षिणादिभिःपरितोष्य
अंजलिबध्वामयायत्कृतंमहारुद्रादिकर्मतत्कालहीनंकर्महीनंभक्तिहीनंशक्तिहीनंवित्तहीनंश्रद्धाहीनंवानुद्र व
तांब्राह्मणानांवचनात्सर्वसंपूर्णमछिद्रंचास्त्वितिप्रार्थयेत् । ततःसंपूर्णमछिद्रमस्त्विति वदेयुः । ततस्तेषांमन्त्राशि
षोगृहीत्वातान्नत्वायंविसृज्यब्राह्मणान्भोजयेत् । दीनानाथांश्चांनादीनासंतोष्यस्वयंसुहृन्मित्रादियुतःसोत्साहं
भुंजीतेति । रामेश्वरप्रसादात्मजनारायणस्मरिणाकाश्यां । कर्मणासंग्रहंनुष्ठेयरुद्रानुष्ठानपद्धतीरचिता । ग्रंथो
ननेकानालोच्यविचार्यसदसच्चयत् ॥ श्रीरामचरणध्यानात्रुद्रतारुद्रस्यपद्धतिः समाप्तिमगमत् ॥ ॥
शके १८८६ तारणाब्दे उदगयनेग्रीष्मर्तौ आषाढशुक्लप्रतिपद्यां समाप्तं ॥ ॥ ॥ ॥
रुद्रहोमसंख्यालिख्यते ॥ रूपे १७१ रुद्री १८७१ लघुरुद्र २०५८१ महारुद्र २२६२९१ अतिरुद्र २४९७०७ ॥
॥ ॥ श्रीरस्तु ॥ ॥ ॥ ॥ ॥ ॥ शुभंभवतु ॥ ॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतिरूद्रपध्यातिः स[illegible]॥